CC-0. Digitized by eGangotri and MIDF- Delhi

आचारिकं नाटकम्



प्रा. रामहरिदाहालः

जयतु संस्कृतम्
केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः
दूरभाषः ०१-५७०५३७१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् इति संस्थायाः षड्विंशतितमं (२६) प्रकाशनम्

आचारिकं नाटकम्

रचनाकारः

प्रा. रामहरिदाहालः

प्रकाशकम्

जयतु संस्कृतम्

नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकनाम-	आचारिकं नाटकम्
रचनाकारः	प्रा. रामहरिदाहालः
प्रकाशकः-	जयतु संस्कृतम्, नेपालः ।
प्रकाशनमितिः-	आषाढस्य ११ दिनाङ्के (नेपाले समायोजितस्य एकोनविंशतितमस्य विश्वसंस्कृतसम्मेलनस्य २०८२।३।१२-१६ शुभावसरे) ।
प्रकाशनप्रतिः-	पञ्चशतम्
सर्वाधिकारः-	रचनाकारे
मूल्यम्-	रूप्यकाणि- ३५०/-
मुद्रणालयः-	किशोर अफसेट प्रेस प्रा.लि.
ISBN :	978-9937-9491-5-6

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

नेपाले २००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्मराजाधिकारि-काशीनाथ-गौतमानां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं बिभर्त्ति। एवञ्च २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्-छात्रावासस्य वाग्रे स्मारकस्तम्भः स्थापितः।

तस्यां संस्थायां रूपान्तरितायां सत्यामनया प्राच्यभाषाधर्मसंस्कृति-परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम्। अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः। अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ। नैपालिक्याः संस्कृतेः सभ्यतायाश्च संरक्षणं तदर्थं गोष्ठी-प्रशिक्षण-कार्यशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया।

अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रे दैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्य आषाढमासस्य प्रथमदिनतः (जयतु संस्कृतमिति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते। एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति। लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति। नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभाग-सञ्चालने, नेपालस्य मुक्तविश्वविद्यालयेऽन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासा जायममानाः सन्ति। द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै संस्थेयं सक्रिया वर्तते। उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने, तत्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रेरणाप्रदाने संस्थेयं सदा जागरूका अस्ति । संस्कृतनाटकानां लेखने तन्मञ्चने च संस्थेयं कार्यं कुर्वाणा वर्तते ।

मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण जयतु संस्कृतम् इति पुरस्कारेण अद्यपर्यन्तं षोडश विद्वांसः पुरस्कृताः सन्ति । १. पं. भीमकान्तपन्थी (२०५६,जगदम्बिकावैभवं महाकाव्यम्) २.पं धनञ्जयमरासिनी (२०५७, हरिहरप्रार्थनापुष्पाञ्जलिः, संस्कृतकाव्यम्), ३. डा हरिहरशर्मा अर्यालः (२०५९, संस्कृकाव्यत्रिवेणी), ४. प्रा.डा. माधवभट्टराई (२०५८), सत्यशाइ-चरितं महाकाव्यम्), ५. प्रा.डा.वेणीमाधवढकालः (२०६०) लिच्छविकालिकाना-मभिलेखानां साहित्यिकं परिशीलनम्), ६. चिकित्सको गोपाल-वैद्यः, किंजल्कः (२०६१ हिमाद्रिमहिमा (काव्यम्), ७. डा.लक्ष्मीकान्तपन्थी (२०६३ ऋतुविचारः सानुवादः) ८. प्रा.डा. टीकारामोऽधिकारी (२०६५, पद्यपुष्पाञ्जलिः, संस्कृतकविता-संग्रहः), ९. पं. लोकनाथलुइँटेलः (२०६६, श्रीरामशरणं मम, (काव्यम्), १०. प्रा.रोहिणीवल्लभपोखेलः (२०६७ भावावर्तः (कविता), ११ प्रा. टीकादत्तबरालः, (२०६८, तत्सम नेपाली व्युत्पत्ति शब्दकोश), १२.प्रा.डा. विष्णुराज-आत्रेयः (२०७१ हनुमदयन-महाकाव्यम्), १३. प्रा. रामहरिदाहालः (२०७३,गतो मदीयो ननु कुत्र देशः, अमरभारतीगौरवम्), १४.डा. लक्ष्मीकान्त पन्थी (२०७५ काव्यमालिका (कविता, ५ खण्डकाव्यञ्च)), १५. प्रा. नीलमणिढुङ्गाना, (२०७८, व्युत्पत्तिमूलक संस्कृत नेपाली शब्दकोश) १६.आचार्य पूर्णचन्द्रढुङ्गेलः, २०७९, देवाधिदेवमहादेव-श्रीनीलकण्ठमहाकाव्यम् ।

संस्कृतवाङ्मयस्य सेवाया आधारेण च संस्कृतविद्वांसो जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति । तत्र सम्मानिताः विद्वांसः सन्ति- डा. स्वामी प्रपन्नाचार्यः (२०६९ फाल्गुनः), तदनु च विविधोपाधिना सह विद्वांसः सम्मानिताः । २०७२ वैक्रमाब्दस्य आषाढस्य १ दिनाङ्के आचार्यः प्रा.खेमराजकेशवशरणः (प्रवचनशिरोमणिः), प्रा.डा. वेणीमाधवढकालः (संस्कृतविद्याशिरोमणिः) सम्मानितौ । (खेमराजकेशवशरणः, तस्य काष्ठमण्डपं समागन्तुमशक्यत्वात् उपाध्यक्षो विष्णुप्रसाददेवकोटा, .सचिवो नवराजकट्टेलश्च, देवघट्टं गत्वा सम्मानं समर्पितवन्तौ ।) २०७६ वैक्रमाब्दस्य फाल्गुनमासे प्रा विद्यानाथोपाध्यायः(तन्त्रन्यायविद्याकेशरी), शरत्कुमारभट्टराई (वेदान्तशिरोमणिः), प्रा. शिवगोपालरिसालः (वेदान्तविद्याकेशरी), प्रा.पुरुषोत्तमभट्टराई (न्यायविद्याकेशरी) च सम्मानिताः । २०८१ वैक्रमाब्दस्य भाद्रमासस्य ७ दिनाङ्के

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्वांसः सम्मानिताः, ते यथा प्रा.डा. ऋषिरामपोखरेलः (वेदविद्याशिरोमणिः), प्रा.डा. दीर्घराजघिमिरे (न्यायवेदान्तकेशरी), प्रा.डा. रामचन्द्रगौतमः (धर्मशास्त्रविशारदः), प्रा.डा. गोविन्दचौधरी (न्यायविद्याकेशरी), प्रा. चेतोनाथ आचार्यः (प्रमाणशास्त्रविशारदः) ।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति अस्मत् प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः। तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः। अथ च २०१८ खीष्टाब्देअष्ट्रलियादेशे अष्टादशतमं सम्मेलनं सम्पन्नम्। तत्र सञ्जातेन सम्मेलनेन २०२४ तमे खीष्टाब्दे नेपाले तादृशसम्मेलनं भविष्यतीति घोषितमासीत्। तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य सम्पादनायात्र एका संयोजनसमितिश्च सङ्घटिता समासीत् । संस्कृतविश्वविद्यालयेन तद्व्यवस्थापने विलम्बो विहितः। अतः प्रयासान्तरेण २०८२ वैक्रमाब्दस्य आषाढमासस्य १२-१६, (सन् २०२५ जून २६-३०) दिनाङ्के विश्वसंस्कृतसम्मेलनं जायमानमस्ति । अस्य समायोजने जयतु संस्कृतमिति संस्थाया महती भूमिकास्ति।

भाषाऽऽयोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति। संस्थयानया संस्कृतलोकभाषाभियानमपि सञ्चालितम्। राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितम्। उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) चास्माभिर्महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्रास्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः। एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतोऽस्ति।

अनया संस्थया ग्रन्थानुवादः प्रकाशनयोजना च स्वकीयस्योद्देश्यस्य मूलाधारे समाविष्टास्ति। तदनुसारं पूर्वकार्यसमित्या निवर्तमानेन चाध्यक्षेण प्राध्यापकेन विद्यानाथोपाध्यायेन संस्कृतभाषायां निबद्धानां दार्शनिकग्रन्थानामनुवादः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशनपरियोजनाचाग्रे सारितासीत्। तस्याः योजनायाः निरन्तरताधुनापि अग्रे प्रवर्द्धमाना एवास्ति। तदनुसारं वेदान्त-न्याय-मीमांसा-तन्त्र-जैन-बौद्ध-दर्शनानामनुवादः प्रकाशनञ्च विहितमस्ति। संस्कृतभाषायां रचितानां मौलिकग्रन्थानां काव्य-नाटक-कथा-निबन्धादिग्रन्थानां सङ्कलनं, सम्पादनं, प्रकाशनञ्च कुर्वन् अग्रे गन्तव्यमिति संस्थायाः महदुद्देश्यं वरीवर्ति। आवश्यकतानुसारेण सामर्थ्यानुसारेण च ग्रन्थरचना-प्रकाशनानुसन्धानादि-कार्याणि च जायन्त एव।

अनया संस्थया नैरन्तर्येण संस्कृतलोकभाषाभियानं सञ्चालितं सञ्चालयिष्यते च। तस्य कृतेऽनेका गोष्ठ्यः कृताः, करिष्यन्ते च। संस्कृतसम्भाषणशिविराणि सञ्चालितानि, सञ्चालयिष्यन्ते च। सञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारौ कृतौ, करिष्येते च। अस्याभियानस्य अभिन्नाङ्गत्वेन संस्कृतरूपकसङ्ग्रह-ग्रन्थसम्पादनाय रूपकाणां सङ्कलनस्य, प्रकाशनस्य च योजना विहिता। तदनुसारेण अनेकानि रूपकाणि सङ्कलितानि प्रकाशितानि सन्ति। अस्याभियानस्य क्रमे प्रा. डा. नवराजकट्टेलवरेण स्वकीयानां लघुरूपकाणां लेखनं सम्पादनकार्यञ्च समकारि। कट्टेलस्य 'कर्मफलम्' इति संस्कृतरूपकसङ्ग्रहः प्रकाशितश्च। एवमेव संस्कृतनाटिकाकौस्तुभनामा रूपकसङ्ग्रहश्च प्रकाशितः।

नेपालेऽनया संस्थया संस्कृतलोकभाषाभियानं सञ्चालितम्। २०७६ वैक्रमाब्दे कोभिड-१९ व्याधिकारणेन संसारोऽवरुद्धः। वयं नेपालिनश्च स्वस्यैव गृहे पिनद्धाः। तदवसरे अनया संस्थया सप्तप्रदेशेषु (२०७७ वैक्रमाब्दे) 'नेपालस्य साधारणशिक्षायां संस्कृतस्य आवश्यकता' इति विषये जूमगोष्ठी विहिता। तदनु सप्तप्रदेशेषु (२०७७-२०७८) पञ्चदशदिवससंस्कृतभाषाप्रशिक्षणं विहितम्। सहस्रशो जनैः प्रशिक्षणे भागो गृहीतः। तदैव संस्कृतलोकभाषाभियानस्य महत्त्वं स्थापितम्। एवञ्च २०७८ वैक्रमाब्दे सम्पन्नायां राष्ट्रियजनगणनायां १४९०० जनताभिः संस्कृतं मम मातृभाषा इति पञ्जीकृतम्। षट्सहस्रेण (६०००) जनताभिः संस्कृतं मम द्वितीया भाषा इति, १,३५,००० जनताभिः संस्कृतं मम पूर्वजानां भाषा इति पञ्जीकृतमस्ति। नेपाले १२४ भाषा पञ्जीकृताः सन्ति तेषु संस्कृतभाषायाः क्रमः ५६ तमेऽङ्केऽस्ति। अनेन प्रयासेन अधुना संस्कृतं नेपालस्य राष्ट्रभाषासु स्थापितं वर्तते।

जयतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनापश्चात् आजीवनसदस्यो भूत्वा अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च भूमिकास्ति। जयतु संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाण अग्रे गच्छन्ती वर्तते नेपालस्य संस्कृतप्रेमिणः जानन्त्येव ।

नेपालिभाषायां कविता, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते । तद्वद् दाहालस्य संस्कृतभाषायामपि कविता, खण्डकाव्यानि, रूपकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति ।

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमशीलास्ति । रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमाना सन्ति । प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो भविष्यति । संस्कृतनाटकमञ्चनस्य प्रतियोगिताञ्च सञ्चालयितुं शक्यते । पारितोषिकस्य व्यवस्थाञ्च अग्रे सारयितुं पार्यते । संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिता एव । अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् आसीत् । तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति । संस्कृतग्रन्थरचनायां ग्रन्थानुवादे च प्रा.डा. नवराजकट्टेलवेरण च ग्रन्थरचनानुवादपुरस्कारः स्थापितोऽस्ति ।

एवमेव नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायमग्रे आगच्छन्तु इति धिया ताः प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति । अस्य कृते अक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति । अस्य कृते जयतु संस्कृतम् इति संस्थायाः निवर्तमानसदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनाय एकलक्षं द्रव्याणि दत्वा नारीप्रतिभायाः विकासाय संस्कृचरनायां ताः प्रोत्साहनाय नारीप्रतिभापुरस्कारं स्थापितवती । एवमेव काष्ठमण्डपवास्तव्या श्रीमती-इन्दिरासापकोटा च एकलक्षं द्रव्याणि दत्वा उद्यमशालिनी-महिलाप्रतिभापुरस्कारश्चस्थापितवती ।

तस्य यथोचितव्यवस्था च विहितास्ति । नेपाल- संस्कृत विश्वविद्यालयस्य शैक्षिकसेवायामनेकाः विदुष्यः सन्ति परन्तु ते काव्यकृतिरचनायां नैव प्रवृत्ताः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्ति । अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति ।

यतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनापश्चात् आजीवनसदस्यो भूत्वा अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च भूमिकास्ति । जयतु संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाण अग्रे गच्छन्ती वर्तते नेपालस्य संस्कृतप्रेमिणः जानन्त्येव ।

नेपालिभाषायां कविता, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते । तद्वद् दाहालस्य संस्कृतभाषायामपि कविता, खण्डकाव्यानि, रूपकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति ।

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमशीलास्ति । रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमाना सन्ति । प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो भविष्यति । संस्कृतनाटकमञ्चनस्य प्रतियोगिताञ्च सञ्चालयितुं शक्यते । पारितोषिकस्य व्यवस्थाञ्च अग्रे सारयितुं पार्यते । संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिता एव । अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् आसीत् । तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति । संस्कृतग्रन्थरचनायां ग्रन्थानुवादे च प्रा.डा. नवराजकट्टेलवेरण च ग्रन्थरचनानुवादपुरस्कारः स्थापितोऽस्ति ।

एवमेव नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायमग्रे आगच्छन्तु इति धिया ताः प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति । अस्य कृते अक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति । अस्य कृते जयतु संस्कृतम् इति संस्थायाः निवर्तमानसदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनाय एकलक्षं द्रव्याणि दत्वा नारीप्रतिभायाः विकासाय संस्कृचरनायां ताः प्रोत्साहनाय नारीप्रतिभापुरस्कारं स्थापितवती । एवमेव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काष्ठमण्डपवास्तव्या श्रीमती-इन्दिरासापकोटा च एकलक्षं द्रव्याणि दत्वा उद्यमशालिनी-महिलाप्रतिभापुरस्कारश्चस्थापितवती ।

तस्य यथोचितव्यवस्था च विहितास्ति । नेपाल- संस्कृत विश्वविद्यालयस्य शैक्षिकसेवायामनेकाः विदुष्यः सन्ति परन्तु ते काव्यकृतिरचनायां नैव प्रवृत्ताः सन्ति । अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति ।

रामहरिदाहालः संस्कृतसाहित्यस्य महान् कविरस्ति । अनेन नाटकानि खण्डकाव्यानि, महाकाव्यञ्च लिखितानि सन्ति । महाकाव्यं प्रकाशनस्य प्रतीक्षायामस्ति, झटिति एव तस्यापि प्रकाशनं भविष्यति । अनेनैव विदुषा जयतु संस्कृतम् नाट्यपुरस्कारोऽपि स्थापितः । द्वयोः काव्ययोः कृते अनेन जयतु संस्कृतम् पारितोषिकम्(२०७५) प्राप्तम्: । स चासौ विद्वान् (वि.सं. २०११। ४।२४) धादिङजनपदस्य बालकुमारी-लीलानाथदाहालयोः पुत्ररत्नत्वेन समजनि । गृहे एव परम्परायां समधीयानो दाहालः रानीपोखरी संस्कृतमाध्यमिकविद्यालयतः मध्यमापरीक्षां समुत्तीर्य वाल्मीकिविद्यापीठात् साहित्यविषयमवलम्ब्य आचार्यपरीक्षां समुत्तीर्णवान् । अनेन विदुषा धादिङजनपदस्यैव राधिकाज्ञानेन्द्रप्रसादयोः कुक्षिजया सावित्रीनामिकया कन्यया सह पाणिग्रहणं विहितमासीत् । तयोः सन्ततयः यथा सृजना-प्रभा-प्रतिभा-सुधा--सुजातादाहालः पुत्र्यः सन्ति चेत् पुत्रः प्रसन्नदाहाल आसीत् स चासौ कालयोगात् (२०८१।१२।२७ दिनाङ्के) दिवङ्गतः । स अमेरिकादेशे एरिजोनाप्रान्ते स्थपति (इन्जिनियर)त्वेन कार्यं प्रकुर्वाण आसीत् । अधुना रुविनाम्नी पुत्रवधूः पर्यावरणस्थपतित्वेन अमेरिकादेशे कार्यं कुर्वाणा अस्ति । तत्रैव दाहालस्य विधुनिभा नाम्नी एका पौत्री च विलसति । पारिवारिकपरिस्थितिः सामान्यं सुमधुरम् ।

तदनु २०३५ वैक्रमाब्दे (भाद्रः १६तः) उपप्रशिक्षकरूपेण वाल्मीकिविद्यापीठे पाठयितुं प्रारब्धवान् । स्वकीयप्रतिभया, परिश्रमेण, प्रशिक्षणकौशल्येन च साहप्राध्यापकः, प्राध्यापको भूत्वा बहूनि वर्षाणि अनेन विदुषा संस्कृतसेवा विहिता । एन विभागाध्यक्षो भूत्वा कदा नेपालसंस्कृतविश्वविद्यालयस्य प्राज्ञिकसमितेः सदस्यो भूत्वा च संस्कृतसेवा व्यधायि । अयं सूरिः महेन्द्रविद्याविभूषणं, शिक्षासेवापुरस्कारः, दीर्घसेवापदकं च लब्धवान् । अस्य संस्कृतसाहित्यसूरेः 'अमरभारतीगौरवम्', (२०७३), 'गतो मदीयो ननु कुत्र देशः' (२०७३) संस्कृतकाव्यद्वयं अधिकृत्य २०७३ वर्षस्य जयतु संस्कृतम् पुरस्कारश्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्मै दत्तः। अनेनोदारमनस्विना 'जयतु संस्कृतं बालकुमारी-लीलानाथदाहालनाट्यपुरस्कार'श्च स्थापितः।

अनेन नेपालीभाषायां 'नेवारपानी' (२०५७) 'शान्तिको खोजी' (२०५७), 'सावित्री' (२०५८), इति त्रीणि खण्डकाव्यानि व्यलेखि। संस्कृतभाषाया 'अमरभारतीगौरवम्', 'गतो मदीयो ननु कुत्र देशः' इति द्वे खण्डकाव्ये प्रकाशिते स्तः। अनेन राधेश्यामभट्टराईवरेण लिखितस्य हलेसीखण्डकाव्यस्य संस्कृतभाषायां समच्छन्दसि अनुवादो विहितः। शिवपुराणस्य भर्तृहरिशतकत्रयस्य च नेपालीभाषायामनुवादो विहितः। संस्कृतनाटकेषु आचारिकं, गुरुकुलचर्यं, सत्प्रभवम्, दृष्टिसृष्टिः इति चत्वारि नाटकानि चत्वारि कर्मसिद्धि, शान्तिदूतम्, प्रत्यादेशनम्, शान्तिसंविदम् इति .एकाङ्कनाटकानि च विलिखितानि। एतेषां प्रकाशनं जयतु संस्कृतमिति संस्थया विहितम्। एवञ्च 'अवधेशचरितं महाकाव्यम्' प्रकाशनस्य प्रतीक्षायामस्ति।

अनेन ऋतम्भरा-जयतु संस्कृतं-मधुपर्कगोरखापत्र-कान्तिपुर-भानुप्रवाह-इत्यादिषु पत्रिकाषु च लेखाः प्रकाशिताः। जयतु संस्कृतं संस्थया सम्पादितयां संस्कृतकविगोष्ठ्यां प्रतिवर्षं संस्कृतकविता रचिता, श्राविता च, ताश्च कविताः संस्कृतकवितासङ्ग्रहे प्रकाशिताः।

छात्रजीवनादेव समाजसेवायां संलग्नो दृश्यतेऽयं सूरिः। जयतु संस्कृतं संस्थायाः आजीवनसदस्योऽस्ति। नेपालविश्वहिन्दुपरिषदः, कलङ्कीस्थज्येष्ठनागरिकसमाजस्य च आजीवन सदस्यो वर्तते। अयं कविःपर्वसुधाराभियानस्य परामर्शदाता, कलङ्कीस्थवैदिकसनातनधर्मसंस्थायाश्च परामर्शदाता, धादिङनीलकण्ठ-प्रज्ञाप्रतिष्ठानस्य मानार्थसदस्यो वर्तते।

इदं नाटकं सर्वदैव सर्वथैव आचारस्य पालनं विधेयमिति विषये लिखितमस्ति। आचारम् अधिकृत्य कृतो ग्रन्थः आचारिकम् इति व्युत्पत्तिः। अतः अत्र नाटके आचार्यलिखितेन स्वल्पमति आचारहीनंम्, अनुशासनहीनं, मर्यादाहीनंञ्च कार्यं विहितम्, अनुमतिं विना अग्रजस्य उपवनस्य फलभक्षणं विहितम्। तस्य कृते स स्वयं राजसमक्षं दण्डं याचते, दण्डितो भवति च।

तथैव नाटकानां प्रकाशनाय कृतभूरिपरिश्रमाय प्रा.डा. विष्णुप्रसादशर्म-देवकोटावराय एवञ्च प्रा. रामहरिदाहालवराय प्रा.डा.मुकुन्दलामिछाने-महोदयाय च हार्दं धन्यवादं कृतज्ञताञ्च प्रकटयामि। अथ च नाटकस्य अध्ययनं, संशोधनं, समीक्षां च कृतवान् प्रा.डा. नूरापतिपोखेलः। एतस्य भूरिपरिश्रमस्य कृते अस्मै विद्वद्वराय कृतज्ञतामाभारञ्च समर्पयामि। स्वयञ्च कर्मफलम् इति एकविंशतिं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लघुनाटकानि विरचय्य नाट्यसाहित्यविवृद्धये भूरिश्रमं कुर्वाणः संस्थायाः सदस्यसचिवः प्रा.डा. नवराजकट्टेलोऽपि धन्यवादार्हः । अस्यैव सदस्यसचिवस्य सक्रियतायां नाटकानां लेखनं, सङ्कलनं, सम्पादनं, प्रकाशनञ्च सम्भवम्, अनेनैव विदुषा पौनःपुन्यं निगद्य रचनाः सङ्कलिताः । एवञ्चास्य सङ्ग्रहस्य प्रकाशनाय संयोजिताः अन्ये च संस्कृतप्रेमिणः धन्यवादार्हाः सन्ति । जयतु संस्कृतम् ।

अध्यक्षः
डा. बद्रीपोखेलः
जयतु संस्कृतम्
अनामनगरम्, काष्ठमण्डपम्- ३२ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाटकचतुष्टयीपर्यालोचनम्

प्रा. नुरापतिपोखरेलः

दृश्यश्रव्यभेदेने द्विधा विभक्तयोः काव्ययोरन्यतमं दृश्यकाव्यम्। तच्च काव्यमभिनयप्रधानत्वादभिनेयकाव्यम्, अनुकर्तर्यनुकार्यरूपारोपणाच्च रूपकपदवाच्यम्। नाटकञ्च रूपकेष्वन्यतमं दृश्यकाव्यम्। विशेषलक्षणं विना रूपकाण्युपरूपकाणि च नाटकवद्भवन्ति। यथा- नाटकं ख्यातवृत्तं भवति चेद् प्रकरणं कल्पितवृत्तमयं भवति। काव्यसामान्यलक्षणेन सह दृश्यकाव्येषु नाट्यशास्त्रप्रतिपादितानां नियमानां पालनमप्यावश्यकम्।

आधुनिकसमये नाटकपदेनाभिनेयं सकलमपि काव्यं बुध्यते। प्राच्यकाव्यशास्त्रे तदर्थे रूपकपदं व्यवह्रियते। पुनश्चाधुनिकनाटकानि गद्यमयानि, पद्यमयानि, गेयानि वोपलभ्यन्ते, संस्कृतनाटकानि तु गद्यपद्योभयरूपाणि। इत्थं संस्कृतरूपकाण्यान्तरविषयं लक्ष्यीकृत्य वर्गीकृतानि दृश्यन्ते चेदाधुनिकनाटकानि संरचनां लयं च लक्ष्यीकृत्य पूर्णाङ्कमेकाङ्कमिति गद्यनाटकं पद्यनाटकं गेयनाटकञ्चेति द्विधा त्रिधा वा वर्गीकृतानि लभ्यन्ते। संस्कृतरूपकाणान्तु काचिद् भिन्नैव स्वीया सरणी। तामेव सरणीमनुसृत्य वत्सगोत्रीयेण रामहरिदाहालनाम्ना विदुषा गुरुकुलचर्यम्, आचारिकम्, सत्प्रभावम्, दृष्टिसृष्टि चेति चत्वानि नाटकानि प्रणीतानि।

प्रथमं खलु नाटकं गुरुकुलचर्यम्। नाटकेऽस्मिन् षडङ्का विद्यन्ते। जिज्ञासवो वटवः कथं गुरुकुलं प्रवशन्ति, कथं वाभिभावकाः स्वसन्ततिं गुरुकुलं प्रापयन्ति, शिक्षालये गुरुकुले कृतप्रवेशा वटवः कथं वाचारप्रधानां शिक्षामर्जयन्ति, शिक्षार्जनानन्तरं कथञ्च दीक्षिता जायन्त इति गुरुकुलसम्बद्धाः सर्वेऽपि विषया अत्र निरूपिताः सन्ति। देवघट्टस्थगुरुकुलं मनसि निधाय पौरस्त्यकाव्येषु पुराणादिषु च वर्णितं गुरुकुलमहिमानं स्मारं स्मारं कविरत्र गुरुकुलचर्यां निरूपयति। गुरुकुलरीतेः समग्रतायाः निरूपणं गुरुकुलदेयाचारादिशिक्षायाः प्रतिपादनं च कवेरत्र लक्ष्यम्। अस्मान्नाटकाद्गुरुकुलानां लक्ष्यम्, गुरूणां गुरुता, अन्तेवासिष्वावश्यका नम्रातादयो गुणाश्च प्रकटीभवन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयमाचारिकं नाटकं सप्तसु अङ्केषु विभक्तमस्ति । तत्र सप्तमोऽङ्को दृश्यद्वये विभक्तोऽस्ति चेदन्ये सर्वेऽप्यङ्का दृश्यविभागरहिताः । बाहुदानदीतटस्थस्वस्वाश्रमनिवासिनोः स्मृतिशास्त्रकारयोः शङ्खलिखतयोरितिवृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति । स्मृतिशास्त्रप्रयोजकयोस्तयोः शङ्खोऽग्रजश्चेल्लिखितोऽनुजः । कदाचिदग्रजाश्रमं प्राप्तो लिखितस्तदनुज्ञां विनैव तदुद्यानस्थमाम्रफलं भक्षयति । ज्ञातवृत्तान्तः शङ्खो लिखितस्य तत्कृत्यं चौर्यं मनुते । दण्डार्हत्वाद् दण्डप्राप्तये तं राज्ञः सुद्युम्नस्य समीपं प्रेषयति । राजधर्मं पालयन् सुद्युम्नस्तस्य पाणिद्वयं छेदयति । दण्डप्राप्त्यनन्तरमग्रजेन सहैव प्रातःकृत्यसम्पादनाय बाहुदां प्राप्तस्य लिखितस्य शङ्खतपःप्रभावेण सूर्यनारायणकृपया च पाणिद्वयं रोहति । आख्यानमिदं महाभारतस्य शान्तिपर्वणि राजधर्मपालनस्याऽऽवश्यकताख्यापनाय प्रसङ्गत उद्धृतमस्ति । इदमेवाख्यानमुपजीव्य दाहालेन स्वप्रतिभया नाटकमिदं प्रणीतम् । आचारस्य महिमप्रदर्शनमेव नाटकनिर्मातुरुद्देश्यम् । एतदर्थमेव नाटकनामाचारिकं विहितम् । सर्वैरेव स्वस्वाचारः पालनीयः । स्मृतिकार एव स्वाचारं न पालयति चेदन्ये कथं पालयेयुरिति स्मृतिकारस्य शङ्खस्य धारणा । पुनश्चोपजीव्ये स्वधर्माचरणेन राज्ञः, दण्डग्रहणेन च लिखतस्य सद्गतिर्निर्दिष्टास्ति ।

तृतीयं नाटकं सत्प्रभावम् । आदिकाव्यस्य रामायणस्य निर्मातुर्वाल्मीकेः प्रथितं पूर्ववृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति । वाल्मीकीये हि रामायणे वाल्मीकिरात्मानं प्रचेतसो दशमपुत्रत्वेन परिचाययति । आदिकाव्यानन्तरं लिखितेषु कतिपयेषु रामायणेषु काव्येषु च रत्नाकरनाम्ना प्रथितो दस्युरेव देवर्षेर्नारदाद् विपरीताक्षरं रामनाममन्त्रमासाद्य तमेव मन्त्रं जपन् तपसा वाल्मीकित्वमवाप रामायणञ्च रचयामासेति तदितिवृत्तमुपलभ्यते । तदेव प्रथितमितिवृत्तमुपजीव्य प्रणीतमिदं नाटकं सप्तभिरङ्कैः समन्वितमस्ति । सत्सङ्गत्या दुर्जनोऽपि सज्जनो जायत इति प्रतिपादनमेव नाटकस्यास्य लक्ष्यम् । न केवलं साधारणा एव जनाः, परं कदाचारपरायणा अपि जना सत्सङ्गतिप्रभावेण स्वजीवनं सफलीकर्तुं परोपकारं च विदधातुं प्रभवन्तीति वाल्मीकेर्दृष्टान्तेन प्रदर्श्यते ।

चतुर्थं दृष्टिसृष्टिनाटकम् । यस्य यादृशी दृष्टिः (धारणा) स तादृशमेव जगत् पश्यतीति शीर्षकतात्पर्यम् । महाभारतप्रमुखचरितानां कौरवपाण्डवानां गुरुकुलाध्ययनकालिकमितिवृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति । अत्र षडङ्का

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यन्ते चेदङ्गाश्च विभिन्नेषु दृश्येषु विभक्ताः सन्ति। अत्र सत्पक्षस्य प्रतिनिधिः पाण्डुतनयो युधिष्ठिरः, असत्पक्षस्य प्रतिनिधिर्दुर्योधनः। युधिष्ठिरो भ्रातृणां मेलनं कामयते चेद् दुर्योधनः सदैव पाण्डवैः सह वैरं विधत्ते। धर्मात्मजो युधिष्ठिरः स्वदृष्ट्यनुसारं सकलमपि जगत् सद्भिः प्राणिभिः पूर्णं पश्यति चेत् पाण्डवैः सह बद्धवैरो दुर्भावनाकलुषहृदयो दुर्योधनः स्वदृष्ट्यनुसारमेव निखिलमपि भुवनतलं दुर्जनैर्व्याप्तं विलोकयति। न केऽपि पदार्था जना वा स्वभावतो हेया ग्राह्या वा, जनानां दृष्टिरेव तान् हेयान् ग्राह्यान् वा सम्पदयतीति नाटकनिर्मातुस्तात्पर्यम्।

उल्लिखितानां चतुर्णामेव नाटकानां प्रणेता नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य वाल्मीकिविद्यापीठस्याऽध्यापकचरः प्रा. रामहरिदाहालः। आजीवनमेव कृतसंस्कृतसाहित्याध्यापनेन, सदाचारादिशिक्षाप्रदानेन स्वान्तेवासिनां सन्मार्गप्रदर्शकेन, वाग्देवतासमाराधनैकलक्ष्येण, 'गतो मदीयो ननु कुत्र देशः' इत्यादिकाव्यनिचयनिर्मात्रा, मर्यादापुरुषोत्तमस्य भगवतो रामचन्द्रस्येतिवृत्तमवलम्ब्य 'अवधेशचरितम्' इति संस्कृतभाषानिबद्ध-महाकाव्य¬प्रणयनसंलग्नेन लब्धसारस्वतकृपाप्रसादेन समादरणीयेन गुरुणा रामहरिणा प्रणीतानि नाटकानीमानि नूनं काव्यतत्त्वविलसितानि नाट्यशास्त्रमर्यादानिबद्धानि च। इमानि नाटकानि मूलतः पौरस्त्यनाट्यशास्त्रनिर्दिष्टां सरणीमवलब्य प्रणीतानि।

सर्वेष्वेव नाटकेषु प्रथितमितिवृत्तं विद्यते। प्रस्तावनया आरब्धेषु नाटकेषु सर्वत्र नान्दीपाठः, प्रस्तावनायां निर्दिष्टानां पात्राणामेव प्रयोगः, तत्र प्ररोचनायाः सन्निवेशः, अङ्कान्ते पात्राणां बहिर्गमनम्, नाटकान्ते भरतवाक्यम्, सुखान्तता चेति पौरस्त्यनाट्यशास्त्रप्रतिपादितानि नियमान्यत्र पालितानि सन्ति। अङ्कानां गद्यपद्यमयतापि सर्वत्र दृश्यते। शास्त्रनिर्दिष्टेषु सम्बोधनादिषु, क्रियापदप्रयोगादिषु च सावधानतावलम्बितास्ति। सूक्ष्मदृष्ट्या विलोकिते पञ्चसन्धीनां प्रयोगोऽपि प्राप्यते। स्त्रीपात्रादिषु प्राकृतभाषायाः प्रयोगस्तु नैवात्रास्ति विहितः। नेपालदेशे प्रणीतेषु नाटकेषु छविलालसूरिप्रभृतीनां कतिपयानामेव नाटककाराणां नाटकेष्वेव प्राकृतभाषायाः प्रयोगः प्राप्यते। नेदानीं प्राकृतभाषाप्रयोगो नाटकेष्वपेक्ष्यत इति परम्परया ज्ञायते। न चैतावता नाट्यशास्त्रनियमानामुल्लङ्घनं जायते। सर्वेषामेव नियमानामक्षरशः पालनन्तु नानिवार्यमिति सन्ध्यङ्गानां सन्निवेशस्तु रसाभिव्यक्त्यपेक्षयैव विधेयः, न शास्त्रनिर्वहणेच्छया विधेय इति व्याहरतानन्दवर्धनेनापि सङ्केतितमेव।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पौरस्त्यनाट्यशास्त्रमवलम्ब्य प्रणीतेष्वपि रामहरेर्नाटकेष्वाधुनिकनाटकाध्ययनस्य प्रभावोऽपि दृश्यते । अङ्कादौ समयनिर्देशनाद्याग्रहस्तस्य प्रमाणम् । अङ्कान्तर्दृश्यानां सन्निवेशोऽप्याधुनिकनाटकाध्ययनजन्यः प्रभाव एव । तेनैवात्र लेखकेन विष्कम्भकप्रवेशकादीनां प्रयोगेऽभिरुचिर्नैव प्रदर्शिता । शास्त्रानुकूलेष्वप्येषु नाटकेषु नाट्यकलायाः पूर्णतः परिष्कारो नानुभूयते, परमिदानीन्तनसंस्कृतनाटकप्रणेतृषु नाटककारः स्पृहणीयः सफलश्च दृश्यते ।

नाटककारो रामहरिर्मूलतः शास्त्रीयछन्दोवद्धानां पद्यानां रचयिता । 'जयतु संस्कृतम्' इति संस्थया यदा सर्वेभ्यो विद्वद्भ्यो रूपकानाम् (एकाङ्कानां पूर्णाङ्कानां चाभिनेयकाव्यानाम्) प्रणयनाय प्रेरणा दत्ता तदैवानेनापि वहूनि रूपकाणि प्रणीतानि । तेषु 'पुनर्जीवनम्' नवम्यां कक्षायाम्, 'कर्मसिद्धिः' चैकादश्यां कक्षायां पाठ्यांशत्वेन निर्धारिते स्तः । चत्वारि (पूर्णाङ्कानि) नाटकानीदानीमुत्प्रेरकयैव 'जयतु संस्कृतम्' इति संस्थया प्रकाश्यमानानि सन्ति । एतदर्थमियं संस्था, अस्याः संस्थायाः सञ्चालकाः सर्वेऽपि महानुभावा धन्यवादार्हाः । सविश्वासमस्याः संस्थायाः सञ्चालकैर्नाटकावलोकनाय, भूमिकालेखनाय च योऽवसरः प्रदत्तस्तदर्थं ते सर्वेऽपि साधुवादेनाभिन्दनीयाः । अस्याः संस्थाया लक्ष्यपूर्तिः स्यात्, नैपालकसंस्कृतवाङ्मयस्य विकासोऽप्युल्लेखनीयः स्यादित्यहं कामये ।

नाटककर्तू रामहरेर्भाषा सरला प्रवाहमयी च विद्यते । सा च सरलता पद्येष्वपि विलसति । अस्मादेव कारणात् पद्येभ्योऽपि गद्यकाव्यादिव सहजतयैवार्थोऽवबुध्यते । लयमेव पुरःकुर्वता लेखकेन कुत्रचिद्धतवृत्ततापि नैवापसारिता । पद्यकाव्यलेखकतयास्य नाटकेषु पद्यानां बाहुल्यं दृश्यते । विशेषेणेषा स्थितिः सत्प्रभावनाटके दृश्यते । राजशेखरप्रणीतानि नाटकान्यपि पद्यबाहुल्यात् श्रव्यकाव्यानीव प्रतीयन्ते । क्वचित् सहजतयाप्येषा स्थितिर्जायते, परं तन्न पाठकहृदयमुद्वेजयति । उपमादीनामलङ्काराणां रमणीयः सन्निवेशो रामहरेः प्रशस्यः पक्षः । काव्यशास्त्रमर्मज्ञतयैवानेन रसभाववक्रोक्तिप्रभृतीनां काव्यतत्त्वानामप्यौचित्यपूर्णः सन्निवेशो विहितोऽस्ति । अभिनेयतां लक्ष्यीकृत्यैव गद्येषु स्थाने स्थाने सन्धीनां प्रयोगोऽपि नैव विहितोऽस्ति । सम्पादनक्रमे स्वल्पपदानां सन्धिर्विहितोऽस्ति । समग्रतया लेखकस्येयमलङ्कृता प्रसादगुणमयी च शैली पाठकमनोरञ्जयितुं क्षमा । नाटकानीमान्यभिनेयानि च सन्ति ।

॥इति॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरोवाक्

ध्वनीगुणीभूतव्यङ्ग्यत्वेन द्विधा निर्धारितस्य चमत्कारप्राणभूतस्य वाक्यकदम्बस्य काव्यस्य दृश्यश्रव्यत्वभेदद्वयञ्च कृत्वा चातुर्विध्यं काव्यं निर्धारितमस्ति पौरस्त्यवाङ्मये। वस्तुतो ध्वनेर्गुणीभूतस्य चान्योन्यसङ्करसंसृष्ट्याऽनन्तानन्तभेदेषु भवितुं शक्तेश्चापि चातुर्विध्यं सर्वसम्मतं व्यावहारिकदृष्ट्या। तत्र दृश्यं दर्शनार्हं सामाजिकेषु सद्यः प्रभावसर्जनक्षमतायाः कारणात् प्रथमं परिगणितम्। द्रष्टुं शक्यं दृश्यमिति व्युत्पत्तौ सत्यामपि एतत् पठ्यं, श्रव्यं दृश्यञ्चानुभूयते। पठ्यकाव्यापेक्षया दृश्यकाव्यस्य महत्त्वं प्रथमतश्चर्चितं विश्वनाथेन दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतमित्युदीर्य। दृश्ये मानवीयानुभूतिः सुस्पष्टं फलितेव विभाव्यते। समाजस्य वस्तुस्थितेश्चित्रणमभिनयमाध्यमाद् विहितं विलोक्यान्तर्मनसि स्वस्यैव मनः संवेगानां प्रस्तुतिर्भूयमानाऽस्तीत्याकलयति सामाजिकः। दृश्यकाव्यं नृत्यगीतसङ्गीतसंवादानां बाहुल्येन प्रयोगात् सातिशयं प्रीतिदम्। कीर्तिस्तु प्रीत्याविर्भवति। प्रथमस्थानं प्रीतिरेव काव्ये। समाजिकप्रीतिततः, स्वस्यापि प्रीतिः, समाजे स्वस्यापि सत्त्वात्। लोकरञ्जनाय प्रयतमानस्य कवेर्धमार्थकामहेतोर्नाट्यविधायाः प्रथममुद्देश्यं समाजस्य प्रीतिरेव भवितुर्मर्हति। समाजस्योत्थानमेव। तत एव ते आकल्पं जयन्ति जीवन्ति च यशःशरीरेण। ध्वनिकृदाह– जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः। नास्ति येषां यशः काव्ये जरामरणजं भयमिति।

नाट्यस्य मूलं वेदा एव – जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि इति भरतवचनमत्र प्रमाणम्। दशरूपककृतोवचनमपि नाट्यस्य वेदमूलकत्वं साधयति। यथा–

उद्धृत्योद्धृत्य सारं यमखिलनिगमानाट्यवेदं विरिञ्चि–

श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः।

इति निगद्य दशरूपककृता चास्य वेदमूलकत्वं संसाध्य महत्त्वमुपरिकृतम्। यच्च नाट्यं वेदवद् महत्त्वाधयितया नाट्यवेदनाम्ना प्रथितं वर्तते। वैदिकसंवादतो नाट्यजगति संवादसर्जनं स्वाभाविकम्। तच्च पाणिनेः समयादपि पूर्वम्। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोरिति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ससूत्रोल्लेखनान्नाट्यसूत्रप्रणयनस्य तन्माध्यमेन नाट्यकलायाः शुभारभणस्य च दर्शनाद् विद्यैषा प्राक्तनी। रामायण–महाभारतकालेषु राजवर्गेण नृत्याभिननयानामायोजनं मुहुर्मुहुर्विधीयमानमासीदिति तत्तत्समयबद्धग्रन्था अत्र प्रमाणभूताः सन्ति। भाससौमिलककालिदासाश्वघोषादीनां समयतः प्रभावशालितया नाटकनाटिकाः सृष्टा अलभ्यन्ते। नाटकान्तं कवित्वम्, आनन्दनिष्यन्दिषु रूपकेषु काव्येषु नाटकं रम्यम्, चमत्कारैकप्राणा रसाः इत्यादिसूक्तानि नाट्यविधायाः सर्वोपरिमहत्त्वं सूचयन्ति।

नैपालकपरम्परायां नाट्यविधा

इन्द्रयात्राया अवसरे दिनाष्टकं यावद् राक्षसनृत्यम् (लाखेनाच) कुमारीभैरवरथयोः परिक्रमणं विष्णोर्दशानां प्रमुखावताराणामभिनयप्रदर्शनमेवामादीनि सांस्कृतिकप्रदर्शनानि प्रदर्श्य नाट्यविधायाः संरक्षणं काष्ठमण्डपोपत्यकावासिभिर्विहितं दृश्यते। यक्षमल्ल–रणमल्ल–जगत्ज्योतिर्मल्ल–भूपतीन्द्रमल्लप्रभृतयो मल्लराजाः संस्कृते नाटकानि विलिख्य प्रदर्श्य च संस्कृतसाहित्यस्योत्थाने महद् योगं दत्तवन्त इति नास्त्यविदितं विदुषाम्। इदानीं प्रदर्श्यमानानि चलचित्राण्यपि नाटकस्यैव रूपान्तराणि केवलं तत्र वैद्युतप्रविधिः प्रयुक्तोऽस्ति येन दृश्यानि विस्मयावहानि सम्पत्स्यन्ते। अतः कथयितुं शक्यते यद् नाट्यविधा सार्वकालिकी अमरविधाऽस्ति मनस्तोषिणी। इदानीमपि सततं नाटकानि प्रदर्शितानि दृश्यन्ते प्रेक्षालयेष्वन्यत्र च। तत्र सांस्कृतिकसंस्थान–प्रज्ञाप्रतिष्ठानेऽग्रगण्ये। सडकनाटकाभिधान्यपि प्रदर्श्यमानानि सन्तीति नाट्यस्य सर्वोपरिता सिद्ध्यति।

नाट्यस्य सर्वोपरितताया आधारः

क) समाजस्याचरवेशभाषासंस्कृतिव्यवहाराणां यथार्थतया चित्रणम् = अवस्थानुकारः।

ख) गीतनृत्यसङ्गीतानां प्रयोगादधिकमनोरञ्जनकता।

ग) मञ्चे संवादस्य रुचिकरप्रस्तुत्या स्वीयकथनमुदीरितमिव सन्तोषः।

घ) तात्कालिकोद्योगवीरता–समाजोत्थान–युद्ध–शान्त्यादीनामुल्लेखनादितिहासज्ञानेन साकं स्वसम्पतायां गर्वानुभूतिः।

ङ) भयकोपहर्षोत्साह-करुणाविस्मयादीनांमानवीयमनःसंवेगानां कमनीय-काव्यामाध्यमात् प्रस्फुटीकरणम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च) विभावादीनां साधरणीकरणाद् व्यक्तित्वक्षमतादीनां सामञ्जस्येन सार्वकालिकतया, सार्वजनीनतया च घटनानामन्तर्मनसि सञ्चरणात् सुखदुःखतः परस्यालौकिानन्दस्य सततमनुभवनम् ।

छ) आनन्दस्य न जातु विच्छेदः ।

ज) अभिनयदर्शनानुपदमेव झटिति परानन्दप्राप्तिः ।

झ) राष्ट्रसेवा–परोपकारिता–दुर्भावनात्याग–सुभवावृद्धिरित्यादिबोधः ।

एवमेवं बहुश आधारा लभ्यन्ते नाट्यस्य सार्वजनीनसार्व-कालिकानन्दप्राप्तौ ।

नाटकरचनाया उद्देश्यम्

शिक्षायां गुरुकुलीयानुशासनपद्धतिर्नितरामुपयुक्ता दृश्यते । तत्र च विशेषतो माध्यमिकशिक्षायाम् । गुरुकुलीयापद्धतौ प्रवर्तितानां प्रातः शय्यात्यादारभ्य शौचस्नानजपसम्पादनपूर्वकमध्ययनतत्परतायाः शिष्यस्य गुरुजनेष्वादरस्य गुरोः शिष्यवर्गे स्नेहस्य भोजनशुद्धतायाः मनोयोगपूर्वकं पठनपाठनयोः, वादविवादसाहित्यिकप्रतियोगितयोः, क्रीडायाश्च समयबद्धतयाऽऽयोजनस्येति क्रियाकलापानां संस्थातगतविद्यालयेषु सामुदयिकविद्यालयेषु च समावेशनमवश्यमपि शिक्षायाः स्तरविकासाय हितकरं सेत्स्यतीति द्योतनाय गुरुकुलचर्यमिति पूर्णाङ्कीयं रूपकमुपस्थापितं वर्तते । एवञ्च समाजे, प्रशासने च वर्धमानामुच्छृङ्खलप्रवृत्तिं लक्ष्यीकृत्य प्रवृत्तिरेषा महती हानिकरी व्यक्तिराष्ट्रसमाजानां कृते इति प्रदर्शनमाचारिकरूपकस्योद्देश्यम् । अग्रजस्य वाटिकायां फलितमाम्रफलं भ्रात्रा भक्षितम्, भक्षणात् प्रागनुमतिर्न गृहीतेति दोषे भ्रातुर्भुजयुगलकर्तनं कारयित्वाऽग्रजेन दण्डो दापित इति घटना कियती निर्दयात्मिकेति चिन्त्यते । कीदृशोऽग्रजोऽस्ति यो हि भ्रातरं कठोरातिकठोरं दण्डं दापयति स्वल्पतरापराधे इति । परमत्र दण्डे कठोरतया परिचालिते सत्येव समाजे सुव्यवस्था स्थिरायते इत्यपि न विस्मर्तव्यं भवति । पुरा यथा निष्पक्षतया राजपुरुषात् सर्वसाधारणजनपर्यन्तं समानो दण्डः प्रदीयते स्म, येन समाजे सुव्यवस्था स्थापिताऽसीत् । इदानीं मानवाधिकारः, वाक्स्वतन्त्रता, नैसर्गिकाधिकारश्चेति नामसु यथाविधा उच्छृङ्खलगतिविधयो जायमानाः सन्ति । तत्र प्रमुखकारणं दण्डहीनता, उत पूर्वदण्डस्याप्रदानमेव । दण्डे पुस्कारे च पक्षपातो यत्र तद् राज्यं दुर्बलायते । राज्यं प्रति जनतायाः संरक्षकत्वविश्वासश्छिद्यते । तथा माऽभूदिति सन्देशमाचारिकरूपकेण प्रवाहयितुमिच्छति रूपककृत् । सत्प्रभावमित्यत्र सत्सङ्गतेर्महत्त्वं चर्चितम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्सङ्गतिः कथय किं न करोति पुंसामितिवद् देवर्षेः क्षणिकसम्पर्कात् प्रथिततरो दस्युरपि ब्रह्मर्षित्वं प्राप। दृश्यन्ते च सत्सङ्गत्याः परमपदभाजो ध्रुवबलिप्रह्लादादयः। तत्र दस्योर्ब्रह्मर्षित्वप्राप्तौ नेपालावनौ तपश्चरणमपि प्रथमाधारः। यत एषावनिस्तयोयोगततन्त्रमन्त्राणामाधारस्थलम्। व्यक्तेरारभ्य समाजस्ततः समग्रराष्ट्रं सदाचरणात् प्रभावितं विकसितञ्च भवति चेत् कदाचरणाद् विनष्टम्। एतत् प्रदर्शनं सत्प्रभावानाटकस्योद्देश्यम्। दृष्टिसृष्टिनाटके दृष्ट्यनुसारेण सृष्टिर्भवति, सद्विचारेण सभ्यतासृष्टिः, कुविचारेण सम्पताक्षयश्चेति प्रदर्शनपूर्वकं परहितसम्पादनायानुकूलचिन्तनाय च प्रेरितं वेविद्यते।

साहित्यस्य पौरस्त्यमान्यतामाधृत्य नाटककृता नाटकानि लिखितानि सन्ति। मान्यतेयमास्माकीना सम्पत् पद्धतिश्च। यथासम्भवं नाटकेषु तत्परिपालितमित्यसौ मनुते। नाटकानि शिक्षाप्रदात्युद्देश्यमूलकानि च सन्तीति असौ विभावयति। सन्दर्भेऽस्मिन्नुचितपरामर्शाः प्राप्स्यन्त एवेत्यसौ विश्वसिति।

एतदीयनाटकचतुष्टयस्याध्ययनं, संशोधनं, समीक्षाञ्च भूरिश्रमेण कृतवते प्राध्यापकवराय नुरापतिपोखरेलमहाभागाय सविशेषं कृतज्ञतां व्याहरामि। नाटकलेखनाय मुहुर्मुहुः प्रेरयन् संस्कृतनेपालीसाहित्यसर्जने लब्धाधिकारो जयतु संस्कृतमिति संस्थायाः सदस्यसचिवः प्राध्यापको डा.नवराजकट्टेलश्च धन्यवादार्होऽस्ति, अनेन संस्कृतरचनायां विधीयमानां प्रेरणां न जातुचिदपि विस्मरति चेतः।

जयतु संस्कृतमिति संस्था संस्कृतप्रशिक्षण–संस्कृत–सम्भाषण–कविगोष्ठीसञ्चालन–नाटकमञ्चन–कृतिप्रकाशनादौ चिराय सततं संलग्ना जायमानास्तीति संस्कृतवाङ्मयसेविनां प्रमोदावाहः पक्षः। अनया संस्थया नेदीयसि समये लघुनाटकानि बृहदाकारकाणि नाटकानि च प्रकाश्यमानानि सन्तीति बोधनान्तरं बृहदाकारं नाटकचतुष्टयं प्रस्तुतमस्ति तत्परतामालक्ष्य जयतु संस्कृतं संस्थायै तत्रानवरतं कार्यरतेभ्यः अध्यक्षोपाध्यक्षसदस्यसचिवेभ्योऽन्येभ्यः सदस्येभ्यश्च भूरिशः साधुवादान् व्याहृत्येत्यादानीं स्ववचः संक्षिपामि।

प्रा. रामहरिदाहालः
दिनाङ्काः २०८१/१२/चैत्रशुक्लद्वादशी
कलङ्की, काष्ठमण्डपः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आचारिकम नाटक (प्रकरण) का विषयमा

प्रा.डा. नवराज कट्टेल

१. विषयप्रवेश

आचारिकम् यो नाटक अहिले मेरो हातमा छ। यो नाटक नेपालनन्तर्गत धादिङ्ग जानपद अभिजन भएका प्रा. रामहरि दहालले लेख्नुभएको हो। यो नाटक, छोटो, छरितो र शिक्षाप्रद रहेको छ। यसनाटकको मूल सन्देश भनेकै 'आचारहीनं न पुनन्ति देवाः' रहेको छ। व्यक्ति, परिवार, समाज, राष्ट्र र विश्वसमुदायको अस्तित्व, प्रगति र शान्ति एवं आनदको आधार आचार हो। त्यो जीवन र जगत्को मूल भनेकै आचार हो, त्यो आचार भ्रष्ट भएमा जीवन र जगत् सङ्कटग्रस्त हुन्छ। यो नाटक २०७७ सालमा लेखिएको हो। यसअघि नेपालमा नाट्यसाहित्यमा लिच्छवि, मल्ल र शाहकालमा केही कामहरू भएका थिए। ती र यस नाटकका विषयमा केही चर्चा गरौँ नत।

नेपालमा लिच्छविपूर्व, लिच्छवि, मल्ल र शाहकालमा संस्कृतका क्षेत्रमा पठनपाठन र लेखनका निकै कामहरू भएको पाइन्छ। अन्य विधाका ग्रन्थहरू प्रशस्त पाइए पनि नाटक विधामा भने ग्रन्थ रचना कम भएको भेटिन्छ। लिच्छविकालमा लेखिएका ग्रन्थ दुर्लभ छन्, त्यसमाथि नाट्यकृति त भेटिएकै छैनन्। चिनिया यात्री ह्वेन्त्साङ्गले आफ्नो यात्रावर्णनमा लिच्छविकालमा जनता नाटक, गीत, संङ्गीत नृत्य आदिबाट मनोरञ्जन लिन्थे भनेकाले नाटक खेलिदो रहेछ भन्ने त वुभिन्छ तर कुन नाटक के कसरी भन्ने चाल पाउन सकिँदैन। मल्लकालमा ३३ वटा नाटकहरूको रचना भएको र अनेकौं नाटक मञ्चन भएको सूचना पाइन्छ। ती नाटकहरू संस्कृत र मिश्रित भाषामा छन्। सबै स्तरीय शुद्ध संस्कृतमा छैनन्। तिनको परिमार्जन आवश्यक छ। शाहकालमा नाटकको रचना निकै कम भएको पाइन्छ। प्रजातन्त्रपूर्व ४।५ नाटकमा भेटिएका छन्। तिनमा शक्तिवल्लभ अर्यालको जयरत्नाकरनाटक, छविलाल सूरिको सुन्दरचरितम् र लवकुशोदयौ, चूडानाथ भट्टरायको परिणाम नाटक रहेका छन्। प्रजातन्त्रपूर्वको शाहकालमा नाटक प्रदर्शन गरिएको सूचना पनि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाउन सकिदैन । प्रजातन्त्रकालीन शाहकालमा भने संस्कृतका दर्जनौं नाटकको मञ्चन भएको पाइन्छ ।

२. नाट्यरचना र नाटक प्रदर्शनको अभियान

लिखितः- अथ किम् । एष एव लिखित इति भवानवगच्छतु । अमुं स्मृतिकारस्य शङ्खस्यानुजं तपोमूर्तेः भक्तिपरमाचार्यस्य शाण्डिल्यस्य तनयञ्चावेहि ।

पथिकः- (साश्चर्यं विलोक्य)
अहह ! भवान् आचार्यवरस्य स्मृतिकारस्य शङ्खस्यानुजः? युक्तम्, भवदीयं सौजन्यमेवैतत् प्रकाशयति । भवानपि अग्रजवद् धर्मविचार्यो वर्तते, इति बुद्ध्वा मोमुद्यते मम चेतः ।

लिखितः- मानवजीवने धर्माचारयोः उपयोगितायाः सम्बन्धे गुरुकुलीयछात्राः बोध्यमानाः सन्ति ।

पथिकः- एवं चेदहं धर्मसम्बन्धे किञ्चिद् जिज्ञासामि ।

लिखितः- कथ्यताम् ।

पथिकः- धर्मशब्देन किं बोधव्यम् ?

लिखितः- यतोऽभ्युदयनिश्रेयसिद्धिः स धर्मः ।

पथिकः- अस्याभिप्रायः ?

लिखितः- मानवजीवनस्य सर्वतोभावेनोदयः आत्यन्तिककाल्याणञ्च यतो जायते स धर्मः ।

पथिकः- कथमिव ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिखितः- धर्मपालकः न किञ्चिदपि वञ्चयति । मनसा,वचसा, कर्मण च सर्वेषां हितमिच्छति । ततस्तस्य इह परत्र चोदयः सम्पद्यते तदनु सर्वतोभावेन तस्य कल्याणं भविष्यति ।

पथिकः- साधु ज्ञातम्

लिखितः- अपरमपि श्रूयताम् ।

पथिकः- अवहितोऽस्मि ।

आचार्यः- यात्रिवर ! भवतो वचनामृतेन धर्मविदग्रजः स्मारितः । तेन सह मेलनाय उत्कण्ठितोऽस्मि । भवान्नातिथ्यमङ्गीकरोतु, आश्रमसुषमाञ्च विलोकयतु फलाहारं करोतु ।(फलार्थं सङ्केतं करोति । फलं गृह्णाति, भुङ्क्ते च) ।

पथिकः- (नतशिरसा) जिज्ञासा च शान्ता जाता । आतिथ्यं स्वीकृत्य फलभोजनं विहितम् । आचार्यस्य दर्शनेन धन्योऽस्मि । ममापि त्वरा वर्तते गच्छामि भो ।

लिखितः- भवता अग्रजः स्मारितः । अतोऽहं अग्रजस्य दर्शनाय, मेलनाय, ज्ञानाय च आचार्यस्य शङ्खस्य आश्रमं गच्छामि । (उभौ उत्तिष्ठतः)

(इति निष्क्रान्ताः सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ तृतीयोऽङ्कः ॥

स्थानम्- शङ्खस्य आश्रमः । समयः- मध्याह्नः ।

(ततः प्रविशति स्मृतिकारशङ्खस्याश्रमे स्मृतिकारो लिखितः ।)

लिखितः- (तारस्वरेणाऽऽकार्य) भो आश्रमवासिनो वत्साः, लिखित आगतोऽस्तीति आश्रमाध्यक्षं संसूचयत ।

अन्तेवासी- (श्रुतमभिनीय)
अतिथिवर ! साम्प्रतम् आचार्या आश्रमे नास्ति । मध्याह्नसन्ध्याक्रियायै सरयूं प्रयाताः । विश्रम्यताम्, आचार्याणां क्षणेनैव दर्शनं मेलिष्यतीति विभावयामि ।

(निष्क्रामति)

लिखितः- (आश्रमसौन्दर्ये विमुह्यन्)
आश्रमव्यवस्था महनीया खलु । तथा हि- एकत्र अध्ययनशाला, इतरत्र यज्ञशाला अपरत्र- अतिथिशाला, कुत्रचिद् गोशाला, स्थानेऽस्मिन्-योगाभ्यासभूमिः। वाटिकायां पुष्पितानि सुवासप्रचुराणि विविधपुष्पाणि च नूनं विस्मापयन्ति समेषां दर्शकानां मनांसि ।

तथा हि-

एतत् किं विबुधैः समादृततमं शोभास्पदं नन्दनं
किं वा चित्ररथादिपुष्टमनिशं कौबेरमुद्यानकम् ।
एवं सौरभवाहिपुष्पनिवहैरूद्यानमावर्धितं
भ्रान्तिं वर्धयतेऽनिशं जनचये लोकोत्तरं किं न्विदम् ॥

किञ्च-

दृष्ट्वा मारूतकम्पितां प्रतनिनीं फुल्लैः सुमैर्मण्डितां
किं वेयं मदनेन वेपिततनू रामेति भो शङ्क्यते ॥
एते फुल्लसुमेषु सक्तमनसो भूभ्वारिणः षट्पदा
नूनं स्मरेमुखीमवाप्य मिलिताः सन्तीव किं पूरूषाः ॥

(पक्वफलान् तरूणसहकारतरुन् विलोक्य सामोदम्)

(प्रकाशम्)

अहो ! आश्रमतरूणां वैभवं दर्शनीयतमम् -

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पक्वैर्लम्बितवृन्तकैः सुरभिमिश्चाताम्रस्निग्धैः फलैः
सर्वे मार्गविहारिणः खगनराः किं सन्ति नाऽऽकर्षिताः ।
यातायातवशेनश्रान्ततनुभिर्विश्राम आसाद्यते
वन्यादुन्नतवृक्षतो मृगनरैः किं किं न वा ऽऽसाद्यते ॥

अन्यच्च-
पुष्पेषु भ्रमराः फले च विहगाः शाखासु शाखामृगा
मूले विश्रमितुं स्थिताश्चपथिकाश्छिद्रेषु कीटादयः ।
एवं पल्लववल्कलादि च जनोत्थाने ददाना द्रुमाः
साक्षाल्लोकहिताय दत्ततनवः सन्तीव किं सज्जनाः ॥
(अत्रान्तरे पक्वानि सहकारफलानि विलोकयति)

अहो ! एतानि सहकारफलानि सरसानि परिणतानि च दृश्यन्ते । स्वादूनि च प्रतीयन्ते । अतिक्रान्तमध्याह्नाद् आगमनायासाद् वा बुभुक्षा वर्धमानेव प्रतिभाति ।
(तूष्णीं तिष्ठति कतिचित् कलाः)
फलं भुक्त्वा बुभुक्षां शमयामि, तृप्तिञ्च आसादयामि ।

(किञ्चित् स्मरणमभिनीय) नैवम्, एषा पुष्पफलवाटिकाऽन्यस्य । नैव ममाधिकारः आस्वादने । (पुनर्वितर्क्य) नहि, तथा न चिन्तनीयम् । यतो वाटिकेयं पूज्याचार्यस्य अग्रजस्य (शङ्खस्य) । कथं न ममापि अधिकारः फलास्वादने ?
(पुनश्चिन्तयित्वा)

श्रद्धेयभ्रात्रा अन्तेवासिनः परिचाल्य सपरिश्रमं निर्मितैषा फलपुष्पवाटिका । भ्रातुरेवैतद् न मम । अतो नास्त्यधिकारो भक्षणे । (इतस्ततः परिभ्रम्य किञ्चित्स्मृतमिव सस्मित वदनं प्रदर्श्य) अग्रजो नाऽन्यः । सोदर्योऽसौ, एतस्य वाटिकायां फलितानि पक्वानि फलानि भोक्तुं कथमहं न प्राप्नोमि ? (वृन्तादाम्रफलं छिनत्ति) (हस्ते गृहीत्वा) फलमेतत् पक्वं रसपूर्णं स्वादु च प्रतीयते । (भक्षयति) (स्वादप्राप्तिमभिनीय) न तृप्तिरेकेन, अपरञ्च भक्षयिष्ये । (लगुडं प्रहृत्यापरं फलं पातयति) (फलं गृहीत्वा) सुमधुरं फलमेतत् । (भक्षयति)
(अत्रान्तरे आचार्यशङ्खस्य प्रवेशः)

शङ्खः- (अन्तेवासिनम् आह्वयति) भो आश्रमपरिसरे कोऽस्ति?

कश्चिद् बटुः- एषोऽस्ति आचार्यवर !

शङ्खः- जलमानय ।

बटुः- आचार्यवर ! जलमेतत् (अर्पयति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(शङ्खः पादौ प्रक्षायति)

लिखितः (सत्वरं हस्तौ मुखञ्च प्रक्षाल्योपगम्य)पूज्याग्रजानभिवादये भ्राता लिखितोऽहम् (प्रणमति) ।

शङ्खः- (आकृतौ ईषद् रोषमानीय) किं त्वया सहकारफलानि भक्षितानि? ।

लिखितः- भक्षितानि पूज्यभ्रातः !

शङ्खः- कस्यादेशेन ?

लिखितः- भ्रातुर्वाटिकाफलमिति विचार्य ।

शङ्खः:- वाटिका भ्रातुः, वाटिकायास्तरुषु फलितानि फलान्यपि भ्रातुर्नतव । तत्कथं ते फलभक्षणेऽभिरूचिः ?

लिखितः- अनुमत्या विना अन्यदीयोद्यानस्य फलभक्षणमवश्यं चौर्यं भवति । परं भ्रातुरूद्यानजफलस्य भक्षणं विशेषचौर्यं न भवतीति तर्कितम् ।

शङ्खः- अन्येन नैजवित्तेन, नैजश्रमेण चार्जितं वैभवमन्यदीयमेव । एकस्यार्जनेऽपरस्य स्वत्वसंभावना न तिष्ठति । वस्तुस्वामिना प्रदत्ते सत्येवापरस्य तत्राधिकारः सेत्स्यति । त्वत्सन्दर्भेऽपि अन्योपार्जितवित्तस्य विनाऽनुमत्या उपभोगाच्चौर्यमेव ।

लिखितः- अवगतम् । अत्र कीदृशं दण्डनमपेक्ष्यते मान्यवर !

शङ्खः- दण्डप्रदानस्य क्षेत्राधिकारो राज्ञि तिष्ठति । अतो राजपार्श्वमेत्य स्वं कृत्यं प्रकाशय । दण्डात् पापनिरसनं ततो धर्मोपार्जनं भवतीति कारणाद् दण्डो ग्राह्यः । आह च मनुः-

"दण्डं धर्मं विदुर्बुधाः" इति । दण्डप्राप्तिरेव ते शुद्धिव्यवस्था ।

लिखितः- एवमेव करिष्ये ।

शङ्खः:- गच्छ राजशासनं पालय ।

लिखितः- प्रतिष्ठते एष राज्ञो दण्डलाभाय । प्रणमति च धर्ममूर्तिनम् मान्यवरम् ।(पादयोः पतति)

शङ्खः:- (दक्षिणकरेण शिरः स्पृष्ट्वा) यशस्वी भव वत्स !

लिखितः- अनुगृहीतोऽस्मि । (प्रतिष्ठते)

(इति निष्क्रान्ताः सर्वे)

॥इति तृतीयोऽङ्कः॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ अथ चतुर्थोऽङ्कः ॥

स्थानम्- राज्ञः सुद्युम्नस्य राजप्रासादस्य सभाकक्षः । समयः- अपराह्नः ।

(ततः प्रविशन्ति राजा सुद्युम्नः, प्रधानामात्यः, राज्ञः कतिचन परामर्शदातारश्च ।)

सुधन्वा- (स्वगतम्) जनसेवायै प्राप्तावसर इति प्रमोदावहः पक्षः, तथापि कर्तव्याकर्तव्यविवेचनं कठिनतरमेव मन्ये। राजपुरूषाणां प्रमादवशात् कदाचित् सज्जनोऽपि दण्डभागी भवितुं शक्नोति। तथा सति राज्ञि पातकं स्पृशति । (अत्रान्तरे कञ्चुकिनः प्रवेशः)

कञ्चुकीः- महाराज ! स्वस्तिभवते। वहिर्द्वारि कश्चन मुनिवेशी ब्राह्मणः आगतोऽस्ति । असौ श्रीमतां दर्शनमभिलषति ।

राजा- शीघ्रं सादरं प्रवेशय । अहं द्वारि स्वागताय मेलिष्यामि ।

कञ्चुकी- यदाज्ञापयति महाराज !

(निर्गच्छति)

(राजा अतिथिमभ्यर्थयितुम् उत्तिष्ठति)

(ततः प्रविशति कञ्चुकिना सह ब्राह्मणो लिखितः ।राजा द्वार्येव पादयोः प्रणिपत्य अतिथिमभ्यर्थयति ।)

राजा- (अतिथिं मञ्चमुपवेश्य) ब्रह्मनिष्ठस्य, श्रोत्रियस्य च भगवतः आगमनेन पावितोऽहम् । पावितं मे कुलम्? तुष्टाः पितरश्च । अपि भवान् सर्वात्मना कुशली ? अपि आश्रमवासिनः कुशलिनः? अपि आश्रमवनं शान्तम् ? अपि आश्रमवर्तीनि उद्यानानि, पुष्करिण्यः, क्षेत्राणि च दुष्टैर्न विनाशितानि ? अपि आश्रमव्यवस्थायै राज्ञः कर्तव्यमवशिष्टम् ?

लिखितः- राजन् स्वस्ति भवते। प्रजावत्सले भवति शासति राज्ये जनतायां कुतः आमयः प्रसरेत् ? भवतो सप्तस्वेव अङ्गेषु अनामयः स्यादिति विभावयामि। आश्रमपदे सर्वे बटवः, गावश्च स्वस्थाः सन्ति। पुष्करिण्यः पुष्पवाटिका, फलोद्यानञ्च न कैरपि विनाशितानि। सर्वाणि पुष्पोद्यानानि पूर्णविकसितानि वर्तन्ते। राजन् अहमधुना नाऽतिथित्वेन परं दण्डयापराधितया प्राप्तोऽस्मि ।

राजा- कथमेवं सम्भवति ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिखितः- श्रूयताम्, अहमेकदा धर्मविद आचार्यवरस्य भ्रातुः अग्रजस्य आश्रमं प्राप्तः ।

राजा- किं स्मृतिकारस्य शङ्खाचार्यस्य?

लिखितः- एवम् ।

राजा- ततस्ततः-

लिखितः- आश्रमे पूज्याचार्यो नासीत् । मध्याह्नकृत्याय नदीं प्रयात इत्यन्ते वासिमुखाच्छ्रुतम् ।

राजा- ततस्ततः?

लिखितः- अहमाश्रमसौन्दर्य लोकं लोकं किञ्चिदभ्रमम् । आमोदीनि पुष्पितानि कुसुमानि, पनसेंङ्गुदीसहकारप्रभृतीनि रसवन्ति फलानि, पुष्पफलेषु भूँभूँवृत्या इतस्ततो विहृत्य सामोदं मधु पायं पायं तारतरेण भूँभूँध्वनिना वयस्यानाह्वयतः षट्पदाँश्च विलोक्य मुग्धोऽभवम् ।

राजा- युज्यते । तदनु-

लिखितः- अहं मार्गश्रमेण श्रान्तः, मध्याह्नातपेन क्लान्तः, बुभुक्षया शिथिलः, पिपासया म्लानश्चासम् । वृक्षमूले अवसम् । शैत्यं शान्तिश्चानुभूते, परं बुभुक्षा वर्धमानैवानुभूता ।

राजा- ततः किम् ?

लिखितः- आश्रमे वृन्तेषु लम्बितानि परिणतानि च सहकारफलानि भूयोभूयो मे दृष्टियुगलमाकर्षयन् । ततो दृष्टिं प्रत्यावर्तयितुं न प्राभवम् । फलभक्षणेऽभिरूचि रूत्पन्ना ।

राजा- स्वादुवस्तूनां प्राप्तेरभिलाष स्वाभाविक एव । ततः-

लिखितः- तदानीमहं जिह्वावशगः कर्तव्याकर्तव्यविचारणायां मूढप्रायोऽभवम् । विवेको लुप्तः । मया कतिचन सहकारफलानि पातितानि, फलद्वयं चूषितञ्च ।

राजा- अपि अत्र भवता आश्रमरक्षकानपृष्ट्वैव फलं भक्षितम् ?

लिखितः- अथ किम् ? फलचूषणावधावेव आश्रमाध्यक्षः पूज्य ऋषिवरः समायातः ।

राजा- आश्रमाध्याक्षेण किमुक्तम्?

लिखितः- मदीयं फलभक्षणकृत्यं विलोक्य आश्रमाध्यक्षः दुःखितोऽभवत् । तेन कथितम्- लिखितः ! कस्यानुमत्या फलानि भक्षितवानसि ।

राजा- ततो भवता किं प्रत्युत्तीर्णम् ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिखितः- अग्रजवर ! मया जिह्वालौल्यात् फलानि भक्षितान्येव। कृतापराधस्य दण्डं स्वीकर्तुं तत्परोऽस्मीति गदितम्।

राजा- ततः ?

लिखितः- मान्यवरेण आश्रमाध्यक्षेण भणितम्- दण्डदाता राजा भवति, तत्पार्श्वमेत्य दण्डं गृहाण। ततोऽहं वाटिकाध्यक्षस्यादेशेन स्वेच्छया च दण्डग्रहणाय भवत्पार्श्वमागतोऽस्मि। राजन् ! दण्डप्रदानेन शोधनीय एष जनः।

राजा- अत्रभवान् एतद्देशस्य धर्मादेशक आचार्यः, ब्रह्मनिष्ठः श्रोत्रियश्च। अतो न दण्डनार्हः। भवान् पूर्ववत् स्वाश्रमे स्थातुं प्रभवति।

लिखितः- राजन् नैतद् वक्तव्यं यतः-

राजा राज्यसुरक्षणाय कथितो मन्वत्रिशुक्रादिभि-
र्दण्ड्यान् दण्ड्यतीह नैव स तदा दोषी भवेन्निश्चयम्।
राज्यं स्यादतिदुर्बलञ्च रिपुभिराक्रान्तसप्ताङ्गकं
तस्माद् दुष्कृतदण्डनं समुचितं दण्डेन राज्यं स्थिरम्॥

राजा- सत्यमुक्तं भवता। तथापि पूज्येषु दण्डनं कथं युज्यते ? यतः-

वेदा अधीताः स्मृतयोऽप्यधीता
नीत्यर्थवाचो बहुधाऽत्र गीताः।
ज्ञानं क्रियायां सततं नयन्त-
स्ते दण्डनीयाः कथमत्र सन्तः ?॥

लिखितः- राजन् मैवं वाच्यम्।

यतो हि-

मनुर्याज्ञवल्क्यो यमो व्यासशुक्रौ
तथाऽन्ये च धर्मस्य पक्षेऽब्रुवन् वै।
द्विजो वाऽपराद्धो जनः कोऽपि राज्ञा
स दण्ड्यो नितान्तं विधे रक्षणाय॥

राजा- अत्र भवतोक्तं सत्यं,

तथापि-

क्षन्तुं दण्डयितुं क्षमो नरपतिर्दोषस्य मात्रां स्पृशन्
भ्रातुश्चूतफलस्य भक्षणविधौदोषो न दृष्टो मया।
दृष्टश्चेदपि क्षम्यते द्विजवरो भूयाद् द्रुतं विज्वरो
भूदेवा निगमागमार्थनिपुणाः सन्त्येव पूज्याः किल॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिखितः- राजन् सदोषमपि दोषविहीनमेवं
निर्णीय दण्डनविधौ शिथिलायसे चेत् ।
आगस्कृतस्त्वयि विशेत् किल दोषजातं
दोषान् विवोढुमिह किं क्षमसे नरेन्द्र? ॥
तद् राजन् ! स्वापराधं भवन्तं वाहयितुं नेच्छामि तथा स्वं कलङ्कमपि । अतो दण्डप्रदानेन भवान् मामनुगृह्णातु ।

राजा- यद्येवं तर्हि धर्मस्थैर्न्यायविद्भिस्सह विमृश्य निर्णेष्ये । तावदतिथिशालायाम् उपविश्यताम् ।

लिखितः- निर्णयं प्रतीक्षिष्ये ।

राजा- कः कोऽत्र भो !

काञ्चुकीयः- देव ! एषोऽहमस्मि ।

राजा- (हस्तनिर्देशनपुरस्सरं) अमुम् अतिथिशालायाम् उपवेशय ।

काञ्चुकीयः- यदाज्ञापयति देवः ।

(इति निष्क्रान्ताः सर्वे)

॥ इति चतुर्थोऽङ्कः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ अथ पञ्चमोऽङ्कः ॥

स्थानम्- सुद्युम्नस्य राजप्रासादः । समयः- अपरह्नस्योत्तरार्धः ।

(ततः प्रविशन्ति राजा सुद्युम्नः, धर्माध्यक्षो, राजगुरूः (सभायाः अध्यक्षः), विवरणाभिलेखकश्च)

अभिलेखकः- (पीठादुत्थाय सर्वान् प्रणम्य राजाज्ञां प्राप्य वक्ति)-
स्वस्ति भट्टारकाय, समादरणीयान् राजगुरुन्, धर्माध्यक्षान्, राजपरिषदः अध्यक्षान् च एष सादरं प्रणमति। इदानीमेकं न्यायिकप्रकरणं निर्णेतव्यं दृष्टम्। एतस्य प्रकरणस्य प्रस्तुत्यै एष अनुमतिं याचते ।

राजाः- (हस्तमुत्तोल्य अनुमतिं ददाति। धर्माध्यक्षश्च दक्षिणकरमुन्नमय्य कथितुं प्रेरयति)

अभिलेखकः- अस्मद्राष्ट्रस्य अन्तर्गतं प्रथितमस्ति धर्मारण्यम्। तत्र गव्यूत्यन्तराले मुनिवरद्वयस्य शङ्खःस्य, लिखितस्य च आश्रमौ वर्तेते ।

धर्माध्यक्षः- प्रथितमेव तदाश्रमद्वयम् ।

अभिलेखकः- उभावेव अन्तेवासिनः पाठयन्तौ, आश्रमवासिनो मुनीन् योगाभ्यासं कारयन्तौ, ग्रामान्तरतः सम्प्राप्तान् ग्रामीणान् अध्यात्मतत्त्वमुपदिशन्तौ दिनचर्यां यापयतः स्म ।

राजगुरूः- श्लाघनीयः खलु क्रियाकलापः । अग्रे अग्रे ।

अभिलेखकः- एकदा मुनिवरो लिखितः स्मृतिकारस्य शङ्खःस्याश्रमं प्राप्तः। आश्रमः पुष्पफलैः सुशोभित आसीत् ।

धर्माध्यक्षः- आश्रमान्तरेष्वपि एतदीयोद्यानस्य चर्चा श्रूयते ।

अभिलेखकः- आश्रमे तदा मुनिवरः शङ्खः नासीत् ।
लिखितस्तत्र आम्रफलद्वयम् अखादत्। अत्रान्तरे मुनिवरः शङ्खःस्तत्राऽऽयातः ।

धर्माध्यक्षः- ज्ञातम्, अनुमत्या विनैव फलं भक्षितमिति ।

अभिलेखकः- एवम्। तदानीं शङ्खोऽभाषत-कस्यानुमत्या फलं खादितवानसि। लिखितेनोक्तम्- भ्रातुः आश्रमफलमिति धिया खादितवानिति। शङ्खःोऽवदत्- अननुमत्या खादनात् त्वं दोषभागसि। राज्ञो दण्डं गृहाण। तदनु दण्डग्रहणाय मुनिवरो लिखितः प्राप्तोऽस्ति। अस्मिन्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्दर्भे कथंविधो दण्डः उपयुक्तः स्यादिति निर्णयनाय राजाज्ञया धर्मसभां विनिवेदयामि ।

राजा- श्रीमद्भी-राजगुरूप्रभृतिभिः प्रकरणमधिगतम् । मया स्वाधिकारं प्रयुज्य क्षन्तुमिच्छितम् । परं मुनिवरो दण्डनमेव अभियाचते । मुनिवरोऽसौ स्मृतिकारः श्रोत्रियश्चेति धिया निर्णयनाय सभासदः अनुरूणद्मि । सभासदां निर्णयो राज्ञाऽनुमोद्यते एव ।

राजगुरूः- विषयोऽसौ श्रवणे सामान्य इव प्रतीयते, परं गभीरो वर्तते । तदपि दण्डनं राजकर्तव्यमेव । दण्डनादेव अपराधा नियम्यन्ते, शान्तिश्च स्थिरायते ।

धर्माध्यक्षः- अभियुक्तस्य दण्डयाचनमुपयुक्तमेव । अपराद्धाः सर्वेऽपि राज्ञा समानभावेन द्रष्टव्याः । जातिधर्मवर्णादीन् प्रदर्श्य उच्चावचदण्डन नोपयुक्तम् ।

राजा- एवं तर्हि दण्डे सौविध्यं न दातव्यम् ।

धर्माध्यक्षः- कथं सौविध्यं प्रदीयते । महामुनेर्याज्ञवाक्यस्य वचनमत्र प्रमाणम्-

अपि भ्राता सुतोऽर्घ्यो वा श्वसुरो मातुलोऽपि वा ।
नादण्ड्यो नाम राज्ञोऽस्ति धर्माद् विचलितः स्वकात् ॥

अत्र स्वकाद् धर्मादिति पदेन वर्णमर्यादायाः, आश्रममर्यादायाः, राष्ट्रियविधेश्च विचलनस्य अवस्थायामिति बोद्धव्यम् । भ्रातृसुतादय एव न, अर्घ्यः इति माननीयाश्चेदपि अदण्ड्या न, अपि तु दण्डनीया एवेति प्रतिपादितम् ।

राजा- फलभक्षणे कीदृशं दण्डनमत्र अपेक्ष्यते ?

धर्माध्यक्षः- राजन् ! अत्र भक्षणं न प्रधानम्, चौर्यं प्रधानम् । अननुमत्या परस्वं छिन्नमिति चौर्यं जातम् । चौर्यं विशिष्टापराधः । चौर्यसम्बन्धेराष्ट्रियापराधसंहितायां येनाङ्गेन चौर्यं कृतं तदङ्गं कर्तनीयमिति उल्लिखितं वर्तते । मन्वादिप्रणीतस्मृत्यादिषु च एवंविधमेव दण्डनं निर्दिष्टमस्ति ।

राजगुरुः- आदिस्मृतिकर्त्रा मनुनाऽपि दण्डस्य सकठोरं परिपालनं प्रतिपादितम्-

दुष्येयुः सर्वलोकाश्च भिद्येरन् सर्वसेतवः ।
सर्वलोकप्रकोपश्च भवेद् दण्डस्य विभ्रमात् ॥

राजा- अभियुक्तो दण्डनपक्षे एवाग्रही, सभासदश्च दण्डनपक्षे सन्ति चेदहं ततो विमुखो भवितुं न शक्नोमि । धर्माध्यक्षो निर्णयं श्रावयतु ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजा- कः कोऽत्र भो !

काञ्चुकीयः- एषोऽस्मि भट्टारक !

राजा- अतिथिशालायाम् अवस्थितं जनमानय ।

काञ्चुकीयः- यदाज्ञापयति भट्टारकः ।

(इति निर्गच्छति)

लिखितः- (आत्मगतम्)

हा धिक् ! हा धिक् !
पिता भक्तिवेदान्तयोर्मूलभूमि-
र्मुनीन्द्रैः समाराधितो मेऽग्रजोऽस्ति ।
परं चैष स्तुत्येऽभिजातोऽपि वंशे
कुकार्यं प्रकुर्वन् कथं जीवतीह ॥

काञ्चुकीयः- अतिथिवर ! भट्टारकेण भवान् आकारितोऽस्ति ।

लिखितः- किमहम् आकारितः ?, एवम् साधयामि ।

(इति संवदन्तौ प्रविशत। कञ्चुकी सभासदान् प्रणम्य राजसङ्केतात् निर्गच्छति। ईषदधोवदनो लिखितः, सर्वान् प्रणम्य राजादेशाद् वसति ।)

धर्माध्यक्षः- श्रूयताम्, एतन्न्यायिकप्रकरणस्य अभियुक्तेन प्रमादवशाद् हस्तौ प्रयुज्य चौर्यं कृतमिति कारणाद् एतद्देशस्य राष्ट्रियापराधसंहिताया आधारेण अभियुक्तस्य हस्तयोः कर्तनं निर्णीतमिति श्राव्यते। एतन्निर्णयस्य विरूद्धे यदिनाम अभियुक्तः क्षमां प्रार्थयते राजा च क्षमते चेत्तत्र सभासदां नापत्तिः ।

लिखितः- कृतेऽपराधे नाऽहं क्षमां प्रार्थये। अहन्तु विध्यनुसारेण दण्डमेवयाचे। यदि मामकीनोऽपराधः क्षम्यते, तर्हि पश्चाद्काले एवंविधेषु अपराधान्तरेषु विहितेषु सत्सु तत्रापि क्षमादानस्य अवसरः प्राप्स्यतीति अनवस्थोदेष्यति ।

सभासदः- साधु साधु। दण्डं प्राप्यापि भवान् यशस्वी अस्ति। गम्यताम् ।

(लिखितः सभासदः प्रणम्य निर्गच्छति ।

राजा- इदानीं सभायाः कार्यसञ्चालनं सम्पन्नमिति हेतोः सभेयं विसृज्यते। (सभायाः समाप्तिसूचकः ॐ मिति ध्वनिः प्रसरति)

(इति निष्क्रान्ता सर्वे:)

॥ इति पञ्चमोऽङ्कः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ अथ षष्ठोऽङ्कः ॥

स्थानम् -शङ्खाचार्यस्याश्रमः । समयः- अपराह्नः ।

(ततः प्रविशति स्मृतिकारः शङ्खः)

शङ्खः- (स्वगतम्)

स्वल्पो भवेद् वाऽथ महान् भवेद् वा
कृतोऽपराधो नहि क्षम्य एव ।
भ्रातेति मत्वा यदि क्षम्यते चेत्
लोको कथं मां क्षमते तदा हि ॥

स्मृतिकारतया मतो जनैः
स्मृतिरूद्धं विदधे कथं किल ।
इतरस्य क्षतिर्हि का क्षतिः
सुकृतं नष्टमहोऽस्ति सा क्षतिः ॥

(अत्रान्तरे छिन्नहस्तस्य किञ्चिदाम्लानमुखस्य लिखितस्य प्रवेशः)

लिखितः (रुदन्निव) भ्रातः !, हस्तद्वयं मे छिन्नम् । अपि भवानथ मां न क्षमते? दण्डः प्राप्तो मया भवदनुकूलम् ।

शङ्खः- भ्रातः ! त्वं मम सदैव प्रियोऽसि । केवलं मया सर्वैर्मर्यादा रक्षणीयेति प्रकाशनायैव त्वं दण्डग्रहणार्थं प्रेरितः, राजसन्निधौ प्रेषितश्च । अत्रान्यथा मा विचारय ।

लिखितः- अहमधुना दण्डं प्राप्य शोधितः । काचित् सन्तुष्टिरपि मनस्युदिताऽस्ति ।

शङ्खः- दण्डः सर्वैर्ग्राह्य एव । दण्डेनैव राज्यव्यवस्था सफलायते । स्मृतिकारतया आवयोः कर्तव्यं महदस्ति । श्रान्तो लक्ष्यसे, त्वमद्य एतस्मिन् आश्रमे निवस ।

(सूर्यविम्बमालोहितं विलोक्य) अस्तं गच्छन्नस्ति अहस्करः । सायन्तनीं सन्ध्यामुपासितुं पापहारिणीं विमलजलां सरयूं गच्छाव ।

लिखितः- अग्रजवाराणामादेशं पालयामि ।

शङ्खः- पश्य- स्पृहणीयः खलु सायं समयः ।

उदयशिखरिकूटाद् रश्मिजालं वितन्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्नचरचरनिकाये चेतनां रातिभास्वान्।
रविरिह जनकार्यं नैव कुर्वन्नुदास्ते
नहि विरमति धीरो लोककार्यात् कदाचित्॥

अपि च- विपिनचरणक्षेत्राद् यान्ति गोष्ठेषु गावो
विहगततिरिदानीं नैजनीडं प्रयाति।
त्वरयति मुनिवर्गो नित्यसन्ध्यामुपास्तुं
दिनकृदपि च सन्ध्यां सेवितुं याति गेहम्॥

लिखितः- अहमधुना चिन्तयामि-
निगमप्रभृतिवाचां सारबोधाय कल्पो
भवति द्विजवरेण्यः श्रोत्रियः सर्वमान्यः।
यदि स विधिविरोधी तस्य वक्त्रं न पश्ये-
दितिरचितधिया किं चास्तमेतीह भास्वान्।

शङ्खः- भ्रातर्नैवं वाच्यम्। महतामपि कादाचित्केन प्रमादो जायते। मानवीय एवैष दोषः।

लिखितः- भ्रातृवर्य ! गर्हितं कृतम्। (दीर्घं निश्वसिति)

शङ्खः- प्रियभ्रातः ! त्वया विचारितं स्यात्-स्वल्पेऽपराधे महान् दण्डः' प्राप्त इति। एकत्र पक्षे तव विचारणा सत्या, परं प्रवृत्तिपक्षे विचारिते एतदनुपयुक्तम्। यथाऽहं तथा त्वमपि आचार्यः, स्मृतिकारश्च। अस्माभिरेवाऽन्ये शिक्षणीयाः। एतदर्थमन्येषामपेक्षयाऽपि आवाभ्यामाचारस्य परिपालने विशेषतः प्रयतनीयं भवति।

लिखितः- अग्रजवर !दण्डः प्राप्तव्य एव। अन्यथा राष्ट्रे दण्डहीनता वर्धते। या च राष्ट्रस्य क्षयकारिणी।

शङ्खः- राष्ट्रे एकोऽपि चौरो न तिष्ठतु। भ्रष्टाचरणं कुतोऽपि न जायताम्, सर्वे स्वस्वक्षेत्रतः पारदर्शितया कार्याणि कुर्वन्त्विति पक्षान् प्रकाश्य अस्माभिर्जनचेतना जागरणीया।

लिखितः- धर्मादुत्तमं न किञ्चनेति कारणाद् न केनाऽपि धर्मो व्यक्तव्यः। अत्र धर्म इति कर्तव्यम्। स्वकर्तव्यं केनाऽपि, कदापि कथमपि च न त्याज्यमिति एषोऽपि विचारयति।

शङ्खः- साधु भ्रातः साधु। एतदेव मया भवतोऽपेक्षितम्। अहमधुना सायं सन्ध्यामाचरामि। हस्ताभावात् त्वं मानसीं सन्ध्यामाचर।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिखितः- मान्यवर !एवमेव विधास्ये ।
(मनसैवाचमन-शिखाबन्धन-प्राणायाम-पापपुरूषनिरसन-गायत्रीजपान् सम्पादयन्निव अभिनयं नाटयति ।)

(उभौ गायतः)

"न जातु कामान्नभयाद् न लोभाद्
धर्मं त्यजेत् जीवितस्यापि हेतोः ।
धर्मो नित्यः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्यत्वनित्यः ॥"

शङ्खः- (आकाशं विलोकयन्निव) रात्र्याः प्रथमप्रहरो व्यतिक्रान्त इवाभाति । इदानीं त्वंश्रान्त इव लक्ष्यसे स्वपिहि । अहमपि शये । (शयनकक्षं निर्दिशति)

(इति निष्क्रान्ताः सर्वे)

॥ इति षष्ठोऽङ्कः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ अथ सप्तमोऽङ्कः ॥

प्रथमं दृश्यम्

स्थानम्- शङ्खस्य आश्रमः । समयः अरुणोदयः ।

शङ्खः- (उत्त्थाय) (आकाशं विलोकयन्निव) अरुणोदयः संवृत्त इव लक्ष्यते । तप्तकनकवत् प्रकाशमानास्तारकाः सम्प्रति मलिनदीधितयो दृश्यन्ते । एष निरन्तरं रविरथवाही काश्यपिररूणो नूनं कार्ये सततं सक्रियतायै जनान् प्रेरयतीव मन्ये । तथा हि-

कदाचित् त्यजेन्नैव स्वं कार्यजातं
स्वकार्यं त्यजन् कः प्रतिष्ठां लभेत ।
तथा ह्येष संवाह्य वाजीननूरु-
र्मुहुस्तथ्यमेवं जनान् भाषते ह ॥

अपि च-

नभोविम्बमस्तीति किं तप्तस्वर्णं
द्रुतैरेव लाक्षारसैर्वा विलिप्तम् ।
समुद्यन्तमालोक्य सूरस्य सूतं
जनेष्वेवमाभासनं बोभवीति ॥

लिखितः- अहमपि मन्ये-

सङ्कोच्य स्वाङ्गं शयितः कुरङ्गो
विस्तार्य देहं द्रुतमुत्थितोऽस्ति ।
विभुक्षितश्चात्तुमसौ तृणानि
दिदृक्षते वन्यभुवं सभार्यः ।

अन्यच्च-

पुण्डरीकनिवहो जलमध्ये
प्रस्फुटन्निव ध्रुवं विलोक्यते ।
यत्र यान्ति भ्रमरा मधुपातुं-
रूपवत्सु किल को न रज्यते ? ॥

अपरञ्च-

व्रतिततरूदलेभ्यः शीतबिन्दून् निपात्य
वहतिशिशिरवातः पुष्पगन्धं प्रसार्य ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विविधसुमपरागे लोभिताः षट्पदाद्याः
कमलसुमपरागे सत्वरं यान्ति हृष्टाः ॥

शङ्खः- भ्रातः! नित्यक्रियायाः सम्पादनाय नदीतटं साधयाव ।

लिखितः- आम् साधयाव ।

(उभौ प्रस्थानम् अभिनयतः)

शङ्खः- विमलजला सरयू आगता । अमूम् प्रणम । भगवती सीता च मातृवदिमां प्रणमति स्म ।

राजाधिराजो महनीयकीर्ती
रामोऽपि स्नातुं सरयूमगच्छत् ।
सीताऽनिशं यत्र जलेऽवगाह्य
देवानृषीन् तर्पयति स्म नित्यम् ॥

(शङ्खः प्रणमति)

"नमामि गङ्गे तव पादपङ्कजं
सुरासुरैर्वन्दितपादपद्मम् ।
भुक्तिञ्च मुक्तिञ्च ददासि नित्यं
भावानुसारेण सदा नराणाम् ॥"

लिखितः- भो मातः ! प्रणमामि भवतीम्, अपराद्धमेतेन । मुखमपि कथं दर्शये । (स्तौति)

-"गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरू ॥"

शङ्खः- आयाहि जलावगाहनं करवाव ।

लिखितः- आगत एवास्मि ।

(उभौ जलमवगाहतः)

(लिखितः महता काठिन्येन स्नाति । मानसम् आचमति, मानसीं शिखाञ्च बध्नाति ।

शङ्खः- (सूर्याय अर्घ्यमर्पयति ।)

- "एहि सूर्य ! सहस्राशो, तेजोराशे जगत्पते !
अनुकम्पय मां भक्त्या गृहाणार्घ्यं नमोऽस्तुते" ।
"जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्,
तमोऽरिं सर्वपापघ्नं तं नमामि दिवाकरम् ॥"

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिखितः- कथमहं सूर्याय अर्घ्यमर्पयेयम् (सूर्यं प्रणमति) (मानसमर्घ्यम् अर्पयति । सूर्यस्य उपासनां करोति)

(गायत्रीजपप्रभावात् अत्रान्तरे लिखितस्य नवीनौ हस्तौ रूहतः)

(सहर्षम्) भातृचरणाः! पश्यन्तु तावद्, मम करयुगलमुत्पन्नम् । अहं सभुजः संवृत्तः ।

शङ्खः- (विलोक्य) तव पुण्यकर्मणः फलमेतत् । त्वया ममादेशेन राजदण्डः स्वीकृत इति हेतोः तुष्टेन मया हस्तसंयोजनाय सूर्यः प्रार्थित आसीत् । भुवनभास्करेण प्रार्थना श्रुता । भास्करकृपया पितृणामाशीर्भिश्च त्वमधुना सबलाङ्गः संवृत्तोऽसि । अतः परं जातुचिदपि प्रमादिना न भवितव्यम् ।

लिखितः- भ्रातः ! प्रमादहीनतायै प्रयतिष्ये ।

(अञ्जलिना सूर्याय अर्घ्यमर्पयति ।प्राणायामजपक्रियादीन् च समापयति ।)

शङ्खः- साधयाव कुटीरम् । तत्रैत्य देवान् अर्चयाव, योगञ्च अभ्यस्याव ।

लिखितः- भवतु, आश्रमं साधयाव । (उभौ प्रस्थानं कुरुतः)

द्वितीयं दृश्यम्

(ततः प्रविशतः कुटीराजिरे मुनिवरौ शङ्खो लिखितश्च)

लिखितः- भ्रातृवर्य ! भवदनुकम्पया मया नवीनं ज्ञानं लब्धम्, नवीनं भुजयुगलञ्चासादितम् ।

शङ्खः:- तवैव आचारनिष्ठायाः फलमेतत् । आचारवान् जनः सर्वथा विजयी भवति । आचारो न केवलं व्यक्त्या, परं समुदायेन, समाजेन, वर्गेण च परिपालनीयः । किं बहुना राष्ट्रस्य सर्वेषु निकायेषु आचारस्य परिपालनमत्यावश्यकमेव ।

लिखितः- सत्यमेतत् । अहं स्वाश्रममेत्य अन्तेवासिनः, अन्याँश्च आचारपालनविषयं बोधयिष्ये । मम आगमनविलम्बेन आश्रमवासिन उत्कण्ठिताः स्युः । अहमपि तैस्सह मेलितुम् उत्कण्ठितोऽस्मि । भ्रातृवर्यात् प्रास्थानिकीम् अनुमतिं प्रार्थयामि ।

शङ्खः- गच्छ । तव यात्रा सफला भवतु । (लिखितः शङ्खस्य पादौ प्रणम्य निर्गच्छति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयं दृश्यम्

लिखितस्य आश्रमः । समयः - अपराह्नः

(ततः प्रविशन्ति आचार्यो लिखितः । अमुमभ्यर्थयितुं प्राप्ताः पुष्पगुच्छकराः कतिचन मुनयोऽन्तेवासिनश्च ।)

अन्तेवासिनश्च- अभिवादयामहे, आचार्यवरम् ।

लिखितः- स्वस्ति भूयाद् भवद्भ्यः । शुभाशिषः सन्तुतराम् ।

अन्तेवासी - भवताम् अदर्शनेन शून्यायितमिव तपोवनम् । तथापि दैनिककृत्यं तपोवनस्य चलदास्ते ।

मुनिः- आचार्यवर ! योगाभ्यासम्, आदेशम्, उपदेशाँश्च प्राप्तुं वयमुत्सुकाः स्म ।

लिखितः- श्रूयन्ताम्, चित्तवृत्तयः प्रायो दुष्परिणामिन्य एव भवन्ति । परं साधकस्य प्रबलेच्छया एताः सुपरिणामिन्यो भवितुञ्च शक्ष्यन्ति । मनसा वास्तविकस्वरूपस्य सततं चिन्तनमेव योगः । चित्तवृत्तिरित्यनेन बहिर्मुखाणां तन्मात्राणामिन्द्रियाणाञ्च स्थूलसूक्ष्मविषयाणामन्तर्मुखीकरणं बोद्धव्यम् । एतदर्थं रजस्तमोगुणयोः तिरोभवनपूर्वकं सङ्वस्य वर्धनमावश्यकं भवति । यदा यदा चित्तवृत्तयोद्रन्तर्मुखितामाश्रयन्ते, तदा सङ्ववृद्धिर्निश्चिताऽस्ति । सङ्ववृद्ध्या स्वरुपचिन्तने सहायता मिलतिः । रजस्तमोगुणौ व्यक्तीः सकामकर्मसु प्रयोजयतः, स्वार्थमूलककर्मसु च । परं सत्त्वगुणो निष्कामकर्मसु योजयति । निष्कामकर्म साधकं कर्मबन्धने न बध्नाति । भगवन्तं प्रापयति । एष एव योगो बोद्धव्यः । "तदा द्रष्टुः स्वरुपेऽवस्थानम्"
तदेति चित्तवृत्तिषु निरूद्धासु द्रष्टा स्वरूपे- असङ्गचेतनरूपे, आनन्दमये स्वरूपे स्वं प्राप्नोति ।

अन्तेवासी - सत्त्वगुणस्य वृद्धिः कथं सञ्जायते गुरूचरणाः!

लिखितः- अस्मिन् सन्दर्भे गीतायां भगवता श्रीकृष्णेनोक्तमस्ति-

अद्वेषा सर्वभूतानां मैत्रः करूण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः समे प्रियः ॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥

अस्याभिप्राय एवं भवितुमर्हतियत्- सर्वप्राणिषु द्वेषाभावता। सर्वे प्राणिनोभगवदंशभूताः, अतः कस्या अपि व्यक्तेर्विद्वेषः भगवत एव विद्वेषो मन्तव्यः। पुण्यात्मसु मित्रता, दुःखिषु करूणा च विधातव्या। शरीरेन्द्रियबुद्धिमनस्सु ममता त्याज्या, अत्र आत्मभावना च निराकार्या। सुखदुःखयो समताधार्या, अपराद्धं प्रति च दण्डनापेक्षया सति सम्भवे क्षमा प्रदातव्या। यस्य कस्यापि वस्तुनोऽप्राप्तावपि सन्तोषो धार्यः अप्राप्ते वस्तुनि प्राप्तेः आकाङ्क्षा च न कार्या।

मुनिः- अत्र भगवतः श्रीकृष्णस्य वाक्ये उल्लिखितस्य योगिपदस्य अभिप्रायः कोऽस्ति।

लिखितः- सततं परमात्मना सह संयुतिमान् पुरूषो योगीति बोद्धव्यः। वस्तुतो कस्या अपि व्यक्तेः परमात्मना सह न कदाचिदपि वियोगोऽस्ति, न भवति, न भविष्यतीति चेति ज्ञानवती व्यक्तिर्योगीति गद्यते।

अन्त्येवासी- आचार्यवर- दृढनिश्चयेति विशेषणाद् किं ज्ञेयम् ?

लिखितः- वत्स !भगवतः सत्ताया इतरा काचित् सत्ता न वर्तते। एकस्यैव परमात्मनः सत्ताऽस्ति, संसारस्य स्वतन्त्राऽवस्थितिर्नेति निश्चयनमेव दृढनिश्चयपदस्याशयो ज्ञेयः।

मुनिः- आचार्यवर ! भगवता भक्तलक्षणानि गीतायां प्रतिपादितानि दृश्यन्ते योगिलक्षणानि च तान्येव। योगिनि, भक्ते च कथं भिन्नता ज्ञातव्या।

लिखितः- श्रूयन्तां मुनयः, वस्तुतो योगिजने भक्तजने च भिन्नता नास्ति, योगिन आसक्तिहीना भक्ताश्च अनासक्ताः, योगिन उदासीना भक्ताश्च उदासीना, सांसारिकवस्तुषु भवन्ति। एवमेव इमे द्वन्द्वातीताः, विमत्सराः, ईशस्वरुपचिन्तकाः, सदातुष्टाः, स्थिरमतयः, अनिकेताः, मुक्तविकाराः, विवेकिनः, गतव्यथाः, शुचयः, निरपेक्षाः शान्ताश्च भवन्तीति उभयत्र साम्यमेव। संसारचक्रान्मुक्तिम् उभावेवेच्छतः। एकता- सिद्धान्तद्वयस्यैव मूलदर्शनं वर्तते। योगिनो जीवब्रह्मणो भक्ताश्च भक्तभगवतोरेकतां मन्वते।

मुनिः- आचार्यवर !, किं तर्हि योगिजने, भगवद्भक्ते च वैभिन्यं नास्ति ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिखितः- वस्तुतो भेदोद्रसन्नपि किञ्चिद् वैभिन्यमाकलयितुं शक्यते । योगिनो निष्कलं, निर्गुणं, निराकारं शुद्धं निरञ्जनमेकं ब्रह्मतत्वं सदन्यदसदिति तर्कयन्ति । परं भक्तो द्वादशषोडशादिकलायुतमिति सकलं, सङ्ववरजस्तमोगुणानवलम्ब्य ब्रह्माण्डनिकायस्य सृष्टिस्थितिविलयान् विदधातीति सगुणम्, विष्णुरूद्ररामकृष्णराधाकालीति रुपादावतीर्णत्वात् साकारम्, ब्रह्माण्डसमूह एवाऽस्य विराट्स्वरुपम्, इन्द्रर्षिमनुसुरासुरमानवयक्षनागादिषु चरेषु लतागुल्मवृक्षनदीशिलादिषु अचरेषु च रुपेषु तिष्ठतीति बहुरुपम्, वंशीविभूषितकरावामाङ्के च विभाति भूधरसुता - नीलाम्बुजश्यामलकोमलाङ्गमि त्यादिरूपान्वितमिति कृत्वा साञ्जनं स्वरूपमिति प्रतिपादयन्ति इन्द्रो मायाभिः पुरूरूप ईयते, मूर्तञ्चामूर्तञ्च ब्रह्मणोरूपे, इत्यादिश्रुतिवचनं प्रमाणीकृत्य । अत्र योगिनो निष्कल-निराकार-शुद्धब्रह्मचैतन्यं स्वाऽभिन्नतया ध्यायन्ति चेद् भक्ताः स्वान् अपराधिनः कर्मपाशबद्धाञ्च मत्वा रामश्यामादीनां बालचरितादीनि पृथक्रूपेण ध्यायन्तीति योगिजने भक्तजने च भेदः ।

मुनिः- आचार्यवर !, अस्माकं कृते कीदृशो मार्गः श्रेयस्कृत् सेत्स्यति ?

लिखितः- यद्यपि अस्मिन् सदर्भे भवन्तो जानन्त्येव तथाऽपि यत्किञ्चिद् निवेदयामि । -

मुनिः- अवहिताः स्म आचार्यवर !

लिखितः- वयं जीवात्मानो वासनाबद्धाः । प्राक्तनकर्मणां भोगाय धृतशरीराः । इदानीमपि यद्यहङ्कारवशाद् मनसश्चापल्याच्च विषयेषु आसक्तास्तर्हि संसारपाशान्मुक्तिर्दुष्करा । तदर्थमहन्तां त्यक्त्वा भगवन्तं सर्वस्वं मत्वा चेशचिन्तनं विधातव्यम् ।

अन्तेवासी- आचार्यवराः एतदर्थं किं मन्दिरेषु गत्वा पूजासामग्रीभिरीश्वरस्य पूजनं विधातव्यम् ?

लिखितः- ईश्वर एव सदन्यदसदिति दृढा भावना मनसि धार्या । स ईश्वरः सर्वत्राऽऽस्ते मयि चाऽऽस्ते । अहमपि तस्मिन्नस्मीति धारणयेशचिन्तनं विधातव्यम् । मन्दिरादिषु एत्याऽपि ईशाराधनं भवितुं शक्नोति, गृहे, गोष्ठे वने वा स्थित्वाऽपि भवितुं शक्नोति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्तेवासी- ईशचिन्तनस्य क्रमः कथंविधो भवितुमर्हति ?

लिखितः- विराट्पुरूषस्य पादतलं पातालमस्तीति विचार्य तद् पादतलं ध्येयम्, ततो रसातलस्वरुपं पार्ष्णिद्वयम्, महातलरुपं गुल्फद्वयम्, तलातलरुपं जङ्घाद्वयम्, सुतलरुपं जानुद्वयम्, वितलाऽतलरुपं ऊरूद्वयम्, चेत्थं भगवतः स्वरुपे सर्वमन्तर्निहितमस्तीति विचार्य विश्वरुपस्य नारायणस्याङ्गानि क्रमशो ध्यातव्यानि । एष प्रथमः क्रमः ।

नवधाभक्तेः पालनयाऽपि ईशाराधनं कर्तुं सुकरम्, यथा च- ईशचरितस्य श्रवणे मनस उन्मुखीभवनं, कीर्तनशीलता, स्मरणेऽभिरूचिः, पादवन्दनमाध्यमेन, अर्चनवन्दनाभ्यां, दास्यभावेन, सख्यभावेन, आत्मनिवेदनद्वारा अर्थात् शरणागतितया च । भक्तेर्नवानां प्रकाराणां सेवनेन वा कस्याञ्चिदपि एकप्रकारिकायां भक्तौ संलग्नतया ईश आराधयितुं शक्यते । एष द्वितीयः क्रमः । क्रमोऽसौ सहजः सुकरश्च वर्तते ।

- सर्वमीशरूपं मत्वा प्रणमनम्, प्रणामावधौ अन्ये हसेयुरपि परं तत्र देहदृष्टिर्लोकलज्जा च त्यक्तव्ये । उक्तञ्च भागवते-

विसृज्य स्मयमानान्स्वान् दृशं व्रीडाञ्च लौकिकीम् ।
प्रणमेद् दण्डवद् भूमावाश्वचाण्डालगोखरान् ॥

अपि च -

खं वायुमग्निं सलिलं महीं च,
ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ।
सरित्समुद्राँश्च हरेः शरीरं,
यत् किञ्च भूतं प्रणमेदनन्यः ॥

एष तृतीयक्रमः ।

जीवाः ईशरूपाणीति मत्वा तेषां सेवनम् । यथा गोसेवनम्, अनाथानां सहयोगाय, तत्परता, लोकस्य सेवा कथं स्यादिति चिन्तनपूर्वकं मार्गचिकित्सालय-विद्यालय-विश्रामस्थल-क्रीडास्थल-धर्मशालावृद्धाश्रमादीनां निर्माणम्, तेषां निर्माणावसरे तन्वा, मनसा, वचनेन च यथासम्भवं सहयोगप्रदानञ्चेति रीत्या ईशः समाराधयितुं शक्यः ।

- मूलतः स्वकर्मणैव ईशाराधना सहजा, वास्तवी, उपयुक्ता च । “स्वकर्मण तमभ्यर्च्य सिद्धिं विन्दति मानवः ।” उक्तञ्च भगवता-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥ इति

अन्तेवासी- "स्वकर्म" इति कथनेन किं बोद्धव्यं गुरूचरणाः ।

लिखितः- यो यत्र यत् करोति, तत् शुद्धं करोतु । यथा वणिग् व्यवसायावसरे उपयुक्तं वस्तु उचितलाभं प्राप्य ददातु । मूल्ये तौले, स्तरीयतायाञ्च असत्यं नाश्रयतु । एतदेव तस्य स्वकर्म भवति । केवलं व्यक्तिगतलाभाय औचित्यं त्यक्त्वा विहितं कर्म कुकर्मैव न स्वकर्म, सुकर्म वा । एवमेव शिक्षकः सम्यक् पाठनेन, शिष्यः सम्यक् पठनलेखनाभ्यां, प्रशासकश्च स्वपरभेदं विहाय निर्लोभतया कार्यं कुर्वाणः, सुरक्षाधिकारिणः शान्तिसुरक्षयोर्दत्तचेतसः कार्याणि कुर्वन्ति चेत्तत एव ते सिद्धिं लभन्ते, ईशाराधनं च तत एव भवति ।

अन्तेवासी- आचार्यवर ! वयं भवन्मुखारविन्दनिसृताद् आचारनिर्देशनात् कृतकृत्याः स्म ।

लिखितः- अहं विश्वसिमि- भवन्त आचारं पालयन्ति, अन्यानपि आचारपालनाय प्रेरयिष्यन्तीति ।

अन्तेवासिनः- आचार्यवराः ! वयमाचाराणां पारिपालने प्रचारणे चाद्यत एव प्रतिबद्धाः भवामः ।

लिखितः- साधु साधु । जगदीशो भवतां शुभकर्मणि सहाय्यं विदधातु ।
(मुनयः, अन्तेवासिनश्च आचार्यं लिखितं प्रणम्य उत्तिष्ठन्ति)

भरतवाक्यम्

"नेतारो जनताहिताय सततं कार्याणिकुर्युर्ध्रुवं
राज्ये कार्यरताः प्रशासनविधौ स्वच्छा भवेयुर्जनाः ।
विद्यायां गुरूशिष्ययोऽस्तु विपुला प्रीतिर्मनस्तोषिणी
वर्धन्तां विविधाः कला जनपदे राष्ट्रं भवेदुन्नतम् ॥"

(इति निष्क्रान्ताः सर्वे)

॥ इति सप्तमोऽङ्कः ॥

•••

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणिनेपालः
१८. दर्शनसारामृतम् - लोकनाथलुइँटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रीपोखेलः
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादः देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः
२५. कवि पण्डित गायत्री गणेशप्रसाद अर्यालका ... - प्रा.डा. नवराज कट्टेल
२६. आचारिकं नाटकम् - प्रा. रामहरिदाहालः
२७. गुरुकुलचर्यम् - प्रा. रामहरिदाहालः
२८. सत्प्रभवं नाटकम् - प्रा. रामहरिदाहालः
२९. दृष्टिसृष्टिनाटकम् - प्रा. रामहरिदाहालः
३०. नेपालमाता (नाटकम्) - नारायणदत्तशास्त्री
३१. मित्रसङ्गमम् नाटकम् - आचार्यः खेमराजकेशवशरणः
३२. कृष्णागारोज्जीवनम् नाटकम् - प्रा.डा. विष्णुप्रसादः देवकोटा
३३. मातृशतकम् (शोककाव्यम्) - प्रा.डा. नवराजकट्टेलः
३४. पृथ्वीशतकम् (खण्डकाव्यम्) - प्रा.डा. नवराजकट्टेलः
३५. संस्कृतनाटिकाकौस्तुभः (लघुरूपकसंग्रहः) - सम्पा. प्रा.डा. विष्णुप्रसादः देवकोटा

ISBN 978-9937-9491-5-6
9 789937 949156

Jayatu Sanskritam, Kathmandu, Nepal